ॐ

प्रथम भाग

(पंचास्तिकाय दर्पण)

टीकाकार-

श्रीमान् जैनधर्मभूषण धर्मदिवाकर-

ब्रह्मचारी सीतलप्रसादजी।

"जैनमित्र" के २७ वें वर्षके ग्राहकोंको
कानपुरनिवासी श्रीमान् लाला-
विशेश्वरनाथ मूलचंदजीकी
ओरसे भेंट।

॥ ॐ ॥

श्रीमत् कुन्दकुन्दाचार्य विरचित—

पंचास्तिकाय टीका प्रथम भाग

अर्थात्

श्रीपंचास्तिकाय दर्पण।

टीकाकार—

श्रीमान् जैनधर्मभूषण धर्मदिवाकर

ब्रह्मचारी शीतलप्रसादजी,

समयसार, नियमसार, इष्टोपदेश, समाधिशतक, प्रवचनसारादिके अनुवादक व गृहस्थधर्म, आत्मधर्म, प्राचीन जैनस्मारक आदिके रचयिता व ऑ० सम्पादक 'जैनमित्र' व 'वीर'—सूरत।

"जैनमित्र" के २७ वें वर्षके ग्राहकोंको

लाला विशेश्वरनाथ मूलचन्दजी—कानपुरकी

तरफसे भेंट।

प्रथमावृत्ति] कार्तिक वीर सं० २४५३ [प्रति ११०८+२००

मूल्य २) दो रुपये।

BIBLIOTHECA INDICA:

A COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE ASIATIC SOCIETY OF BENGAL.

NEW SERIES NO. 1313.

न्यायवार्त्तिकतात्पर्यपरिशुद्धिः ।

श्रीमदुदयनाचार्यविरचिता ।

श्रीवर्द्धमानोपाध्यायविरचित-न्यायनिबन्धप्रकाशाभिध-व्याख्यासहिता ।

NYAYA-VARTTIKA-TATPARYA-PARISUDDHI

BY UDAYANĀCHĀRYA

With a gloss called Nyāya-nibandha-prakāśa by Varddhamānopādhyāya

EDITED BY

Pandit Vindhyeśvarí Prasád Dvivedin

Librarian Govt. Sanskrit College, Benares.

AND

Pandit Lakshamana Sástri Drávida

Professor, Govt. Sanskrit College Calcutta.

FASCICULUS II.

CALCUTTA:

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,

No. 5, Nandakumar Chaudhury's 2nd Lane,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 1, PARK STREET.

1911.

...SALE

...ENGAL.

...TA,

...RD QUARITCH,
...N, W., AND MR. OTTO
...ZIG, GERMANY.

...cannot be supplied.— some ...k.

	Rs.	As.
...	1	4
...	1	14
...	5	10
... 1-5; Vol. III.		
...	14	6
...	2	0
...	2	8
...	1	0
...	3	12
...	1	4
...	0	10
...	3	2
...; Vol. II. Fasc.		
1-7 @ 1/ each	15	0
Bālam Bhaṭṭī, Vol. I, Fasc 1-2, Vol 2, Fasc. 1 @ /10/ each	1	14
Baudhāyana S'ranta Sūtra, Fasc 1-3 Vol. II, Fasc 1-3 @ /10/ each	3	12
***Bhāmatī**, Fasc 4-8 @ /10/ each	3	2
Bhāṭṭa Dīpikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10/ each	4	6
Baudhyostatrasangraha	2	0
Bṛhaddevatā Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3	12
Bodhisaryāvatāra of Çāntideva, Fasc. 1-5 @ /10/ each	3	2
Çri Çantinatha Charita, Fasc. 1-3	1	14
Çatadūṣaṇī. Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc 1-4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. I-5, Vol. III,		
Fasc. 1-7 Vol. 5, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. 6, Fasc. 1-3 @ 1/4/ each	3	2
Ditto Vol VII, Fasc. 1-5 @ /10/	3	2
Çata[illegible]hasrikā Prajñāparamitā Part, I, Fasc 1-14 @ /10/ each	8	12
***Çaturvarga Chintāmaṇi**, Vol II, Fasc 1-25; Vol. III Part I,		
Fasc 1-18, Part II, Fasc. 1-10 Vol IV, Fasc 1-6 @ /10/ each	36	14
Ditto Vol 4, Fasc. 7-8, @ 1/4/ each	2	8
Ditto Vol IV, Fasc. 8-9 @ /10/	1	4
Çlockavartika, (English) Fasc 1-7 @ 1/4/ each	8	12
Çrauta Sūtra of Āpastamba, Fasc 1-17 @ /10/ each	3	12
Ditto Çāṅkhāyana, Vol. I, Fasc 1-7; Vol. II, Fasc. 1-4,		
Vol. III, Fasc. 1-4; Vol 4, Fasc 1 @ /10/ each	16	0
Çri Bhāṣyam, Fasc 1-3 @ /10/ each	1	14
Dāna Kriyā kaumudī, Fasc 1-2 @ /10/ each	1	4
Gadadhara Paddhati Kalasāra Vol. I, Fasc 1-7 @ /10/ each	4	6
Ditto Āchārasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol I @ /10/ each	3	2
Ditto Vol II, Fasc. 1-2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralata	1	14
Karmapradiph, Fasc. I	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	6
Kātantra, Fasc 1-6 @ /12/ each	[illegible]	8
Kathā Sarit Sāgara, (English) Fasc. 1-14 @ 1/4/ each	17	8
***Kūrma Purāṇa**, Fasc 1-9 @ /10/ each	4	6
Lalita Vistara, (English) Fasc 1-3 @ 1/- each	3	0
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāṣya pradipodyota, Vol. I, Fasc 1-9; Vol. II, Fasc. 1-12 Vol III,		
Fasc. 1-10 @ /10/ each	19	6
Ditto Vol IV, fasc. 1 @ /4	1	4
Manutikā Sangraha, Fasc. 1-3 @ /10/ each	1	14
Mārkaṇḍeya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0

यति । तदिदमुक्तमिति ।[८।७] निश्चयानुमाने न प्रामाण्यावधारणानुमानबीजभूतव्याप्तिग्रहणाभ्यां विना, ते च न प्रवृत्त्या विना, प्रवृत्तिश्च न निश्चयानुमानाभ्यां विनेत्याक्षेपसङ्ग्रहः (१) ।

इह च द्विविधा प्रवृत्तिः ऐहिकफला ऽऽमुष्मिकफला च । ~ ऽमुष्मिकफला प्रामाण्यावधारणपूर्विकैव । ऐहिकफला त्वपेक्षितोपायताज्ञानमात्राधीना अर्थनिश्चयमपि नापेक्षते, प्रागेव प्रामाण्यस्वरूपज्ञानं, कुतस्तरां तद्विनिश्चयम् । यत्रापि प्रवृत्तेः प्रागेव प्रमाणतत्त्वविनिश्चयः तत्राऽप्यसौ स्वहेतुबलादायातो न प्रवृत्तिं प्रति प्रयोजको ऽन्यथैकान्तिकविजयानिश्चये

रूपता चेति । प्रक्रान्तत्वादिति । समर्थप्रवृत्तिजनकत्वस्य प्रस्तुतत्वादित्यर्थः । निश्चयश्चानुमानञ्च निश्चयानुमाने । ते चेति । ते द्वे प्रामाण्यावधारणानुमानबीजभूतव्याप्तिग्रहणे इत्यर्थः । "समाधानं विभजत" इति टीकायां समाधीयते ऽनेनेति समाधानं-सिद्धान्तवाक्यं तस्यैव व्याख्येयत्वात् । अत एव पूर्वमाक्षेपवाक्यं विभजत इत्युक्तम् । विभजते-व्यक्तीकरोतीत्यर्थः ।

ऐहिकफला त्विति । सन्देहाविनिश्चयादप्यगृहीतप्रामाण्यात् प्रवृत्तिदर्शनादित्यर्थः । अन्यथेति । यत्रापि युक्तिसमीचीनत्व-

(१) आक्षेपसंक्षेपः पा° २ पु° ।

प्रामाण्याक्षेपक एव विजिगीषुः कथायां न प्रवर्त्तेत। तस्मादर्थानिश्चये ऽपि प्रवृत्तिरित्युभयवादिसिद्धं हृदि निधाय सिद्धान्तमुपक्रमते। तत्र ब्रूम इति ॥ [८।११]

दृष्टार्थेष्विति अदृष्टार्थागमादिव्युदासः तत्र प्रवृत्तेः फलाभिसम्बन्धानिश्चयात्। अनभ्यासदशापन्नेष्वित्यभ्यासदशापन्नपितृवचनादिव्युदासः। ते हि प्रमाणतया प्रवृत्तेः प्रागेव निर्णीयन्ते। अभ्यासश्चाऽविपरीतो विवक्षितः। तेन स्वात्मन्यभ्यासे ऽपि प्रवृत्तिसामर्थ्यादेव तन्निश्चयो ऽविपरीताभ्यासविरहात्। स च विषय-

---

निश्चयाद्विजयनिश्चयस्तत्रापि स स्वहेतुबलायातो न प्रवृत्तिप्रयोजकस्तं विनापि विजयसन्देहात् प्रवृत्तिदर्शनादित्यर्थः। "सत्यं न स्वतः प्रामाण्यावधारण"मिति टीकायां परतः प्रामाण्यावधारणे ऽन्योन्याश्रयात् स्वत एव प्रामाण्यावधारणमितीत्यमङ्गीक्रियेतापि, किं तु तदप्रयोजकयुक्त्या निरस्तमित्यभिप्रेत्य तदप्यनूदितम्। "प्रवृत्तिसामर्थ्यादेवे"ति टीकायामेवकारेण तज्जातीयत्वमात्रव्युदासः। अनभ्यासदशापन्ने ऽपि क्वचिदाप्तवाक्यात् प्रामाण्यावधारणात् ॥

तेनेति। आत्मनः शरीरतया ऽभ्यासे ऽपि न तस्य शरीरत्वनिश्चय एवमन्यत्रापि भ्रमाभ्यास इत्यर्थः। एतच्च तज्जातीयत्वग्राह्यप्रामाण्यव्यतिरेकपरम्। वस्तुतो भ्रमाभ्यासे प्रवृत्तिसामर्थ्यस्याप्यभाव एव। स चेति। स चाभ्यासः क्वचिद्विषयगोचरो

गोचरस्तन्नान्तरीयकार्थगोचरो वा तज्जातीयत्वावधा-
रणोपायो यत्र स्वरूपतोऽपि नास्ति तत्र प्रवृत्तिसाम-
र्थ्यादेव तद्गोचरस्य प्रामाण्यावधारणं, यथा वैद्यवच-
नादनर्थनिवृत्तिं सम्भावयतोऽसंस्तुतप्रदेशस्थितेषु (१)
मूलेषु, यत्र तु स्वरूपाभ्यासोऽस्त्येव तद्गतं तु श्रेयः-
साधनत्वमनभ्यस्तं तत्र प्रवृत्तिसामर्थ्येन तत्साधनत्व-
ग्राहिणः प्रामाण्यं, यथाऽग्निः पाकादिसमर्थ इति
सम्भाविताप्तत्वस्य वचनादुपलभ्य स्वयं पचतः । यत्रापि
श्रेयःसाधनत्वाभ्यासः स्वरूपे त्वनभ्यासस्तत्रापि स्वरूप-
गोचरस्यैव प्रामाण्यं प्रवृत्तिसामर्थ्यादवसीयते, यथा

यथा कुड्याद्येकव्यक्तिगोचरः, क्वचिद्विषयनान्तरीयकधर्मगोचरो
यथा पृथिवीत्वनान्तरीयकगन्धगोचरः प्रामाण्यानुमितिजनक-
परामर्शगोचरतज्जातीयत्वावधारणोपाय इत्यर्थः । स्वरूपतोऽपीति ।
अपिः श्रेयःसाधनत्वाभ्यासमसमुच्चये । असंस्तुतेति । परिचित-
प्रदेशस्थस्य पूर्वं प्रत्यक्षादिना ऽनुभूतत्वेनाभ्यस्तत्वात् । ततश्चासंस्तुत-
प्रदेशस्थेनानेन मूलेन ज्वरो नश्यतीति श्रुतवैद्यवचनः प्राप्य
मूलं ज्वरनाशं चासाद्य वैद्यवाक्यजबुद्धेः प्रामाण्यं निश्चिनो-
तीत्यर्थः । यत्र त्विति । यत्र वह्निगोचरोऽभ्यासोऽस्त्येव पाक-
साधनत्वगोचरो नास्ति तत्राप्तवचनात् प्रवृत्तः पाकमासाद्याऽऽप्त-

(१) असंस्कृतप्रदेशस्थितेषु इति २ पु० पा० ।

ऽग्निः पाकादिसमर्थ एवेति निश्चितवतो ऽपरिचित-वनवह्नौ। सर्वत्रैवार्थभूयस्त्वं विपर्यये त्वनर्थमान्द्यं सम्भावयतः प्रवृत्तिः स्वरूपश्रेयःसाधनत्वनिश्चये ऽपि फलसन्देह इवेत्याह। नो खल्विति॥ [८।१३]

तदमी संशयाना अपि प्रवर्त्तमानाः फल इव स्वरूपश्रेयःसाधनत्वयोरिति शेषः। प्रमाणस्य-स्वरूप-

---

वाक्यस्य प्रामाण्यं निश्चिनोतीत्यर्थः। अपरिशीलितेति (१)। वह्निः पाकसमर्थ इत्यभ्यासेनापरिचितवनवह्नौ प्रवृत्तः फलमासाद्य तज्ज्ञानप्रामाण्यं निश्चिनोति न तु प्रागेवेत्यर्थः। ननु प्रकृते प्रवर्त्तकज्ञानप्रामाण्यसन्देहादुपायत्व एव सन्देहः यत्र च फलसन्देहात् प्रवृत्तिस्तत्रोपायतायां निश्चय एवेति वैषम्यमित्यत आह। सर्वत्रैवेति। अर्थभूयस्त्व-मनिष्टापेक्षया इष्टस्य बलवत्त्वं, विपर्यये फलाभावे अनिष्टस्य लघुत्वमित्येतावन्मात्रं दृष्टान्तदार्ष्टान्तिकयोः साधर्म्यं पुरस्कृत्यैतदुक्तमित्यर्थः॥

अत एवानुरूपं विशेषमाह। फल इवेति। यद्यपि "प्रामाण्यं विनिश्चित्ये"त्यग्रिमटीकादर्शनात् प्रामाण्य इति शेषो दातुमुचितस्तथापि प्रामाण्यसंशयाहित एव स्वरूप एव श्रेयःसाधनत्वसंशये तात्पर्यम्। तत्त्वं प्रमाणविषयत्वमिति वक्ष्यते तथा च

---

(१) क्वचिन्मूले ऽपरिशीलितवनवह्नौ इति पाठस्तदनुसारेण अपरिशीलितेति पाठो युक्तः।

ग्राहिणः श्रेयःसाधनत्वग्राहिणश्चेत्यर्थः । तत्त्वं-प्रमाणत्वम् अर्थाव्यभिचारिप्रमासाधनत्वमिति यावत् । विनिश्चित्या-र्थाव्यभिचारिप्रमाविनिश्चयद्वारेणेति शेषः । तज्जातीय-स्यान्यस्यैतावतैव समर्थत्वे ऽभ्यासदशापन्नस्येति दृष्टार्थ-प्रमाणसंग्रहार्थम् । तेनायमर्थः यद्यपि दृष्टार्थेष्वभ्यास-दशापन्नेष्वपि प्रवृत्तिसामर्थ्यमस्ति तेनापि प्रामाण्य-मवधारयितुं तत्र शक्यते, तथापि तज्जातीयत्वलक्षणे-नैव लिङ्गेन प्रवृत्तेः प्रागेवावधारिते प्रामाण्ये तत्प्रमा-तुरुत्तरकालं प्रमित्सैव नास्ति, तन्निबन्धनत्वाच्चानु-मानप्रवृत्तेः । यदि पुनः प्रमित्सानपेक्षं समर्थप्रवृत्तिजन-

---

प्रमाणतत्त्वं भ्रमे द्रव्यत्वादिकमस्तीत्यत आह । प्रमाणत्वमिति । प्रमाणपूर्वकत्वात् तत्परामर्श इत्यर्थः । प्रमाणत्वं प्रमात्वं मा बोधीत्यत आह । अर्थेति । अर्थाव्यभिचारिप्रमासाधनत्वमित्यत्र प्रमापदमनुभवमात्रपरमतो न पौनरुक्त्यम् । न च प्रमाणपद-स्यात्र कारणपरत्वे "संवेदनस्यार्थाव्यभिचारिताकथनेन तत्करणा-नामव्यभिचारित्वमुक्तं वेदितव्य"मित्यग्रिमटीकाविरोधः, अत्र विशेषणमात्रे प्रमायां तात्पर्यात् अत्रोक्तस्यैवार्थस्याग्रे उपसंहारा-दिति भावः । तथाप्यौपयिकं प्रामाण्यं कथं निश्चेयमित्यत आह । अर्थेति ॥

कत्वं परामृश्यते तदा का क्षतिः तेनाप्यनुमीयतां प्रामाण्यं, प्रमाणसंप्लवस्यापि व्यवस्थापितत्वात् ॥

ननु किमिदं तज्जातीयत्वं ? न तावत्प्रमाणजातीयत्वं साध्याविशिष्टत्वप्रसङ्गात् । नापि समर्थप्रवृत्तिजनकजातीयत्वं, तद्धि समर्थप्रवृत्तिसम्बन्धो वा स्यात् तदुपहितो वा नियतप्रागभावः । न तावदाद्यः प्रवृत्तेः प्रागेवेति वचनात् । नाप्युत्तरः तस्याप्यतीन्द्रियस्य लिङ्गं विना प्रत्येतुमशक्यत्वात् । लिङ्गं च तस्य प्रामाण्यैकनियतस्य यद्यस्ति तदा प्रामाण्यमेवानुमीयतां किं तज्जातीयत्वानुमानेन । प्रमाणानियतस्य तु(१) तस्यानुमानेन किम् ।

तेनापीति । यदा पुरुषान्तरेण जिज्ञास्यते तदा स्वयं प्रमित्साविरहेऽपि परप्रबोधनार्थमित्यर्थः ॥

तदुपहितः तन्निरूपितः। प्रागभावः-पूर्ववर्त्तिजातीयत्वम् । तस्याऽप्यतीन्द्रियस्येति । न चान्वयव्यतिरेकावेवोक्तौ तौ च प्रत्यक्षावेवेति वाच्यम् । प्रमात्वेनैवावच्छेदकेन तयोर्ग्रहात् तदग्रहे तयोरप्यग्रहात् । अवच्छेदकान्तरात् तु तद्ग्रहे तेनैव प्रामाण्यानुमानापत्तेरिति भावः । प्रामाण्यमेवेति । व्याप्यव्याप्यस्य तेनापि नियमादित्यर्थः । प्रामाण्यानियतस्य त्विति । प्रामाण्यानुमित्यर्थं

(१) प्रामाण्यानियतस्य त्विति —पा० २पु० ।

नापि प्रत्यक्षसिद्ध एव कश्चिद्धर्म्मस्तज्जातीयत्वं, प्रत्यक्षत्वे तस्यानभ्यासदशापन्नगोचरे ऽपि प्रमाणे प्रतीतिप्रसङ्गात्। तथा च प्रवृत्तेः प्रागेव तत्रापि प्रामाण्यावधारणं स्यात्, व्याप्तेरपि प्रागेव प्रतीतत्वात्। न ह्ययं क्वचिदपि तज्जातीयत्वेन प्रामाण्यं नानुमितवान्। तत्र नास्त्येव तज्जातीयत्वं कुतः प्रत्यक्षेण प्रतीयमानता तस्येति चेत्। न। अभ्यासदशापन्नेषु तज्जातीयत्वेन प्रामाण्ये ऽनुमीयमाने प्रवृत्तिसामर्थ्यानुमितप्रामाण्यस्य साधनविकलतया दृष्टान्ताभासत्वप्रसङ्गात्। तस्मात्तज्जातीयत्वमनतिप्रसक्तं (१) न पश्याम इति।

सत्यं तथापि ज्ञानस्य विषयनिबन्धनत्वात् तत्तद्विषयोपाधय एव ते ते ज्ञानोपाधयस्तैरुपधीयमानं ज्ञानमेव तज्जातीयं तस्य भावस्तत्त्वं भवति, ते चोपाधयः प्रतिभेदं स्वसंज्ञाभिरभिधातुमशक्या इति तज्जातीयत्वमित्यनया वाचोभङ्ग्या दर्शिताः। अत एवात्र वीप्सा

तज्जातीयत्वानुमानात् प्रामाण्यनियमेन च प्रामाण्यानुमानात् व्यर्थं तदनुमानमित्यर्थः। तत्र नास्त्येवेति। अनभ्यासदशापन्नगोचरे प्रमाण इत्यर्थः।

(१) तज्जातीयत्वमतिरिक्तम् इति पु० २ पा०।

द्रष्टव्या तत्तज्जातीयत्वमिति। तथाहि-अनुभवस्तावत् स्वरूपप्रकारावालम्बते। तत्र धर्मिस्वरूपेणोपधीयमानो ऽनुभवः प्रमैवेति तेन रूपेणानुभूते तस्मिन् प्रमात्वमेवानुभूतं भवतीत्यग्रे स्फुटीभविष्यति। प्रकारविषयस्त्वनुभव उभयथा, कश्चित् स्वरूपप्रकारेणोपधीयते कश्चिदस्वरूपप्रकारेणापीत्यतः क्वचित् संशयः। तत्र स्वरूपप्रकारेणोपहितमनुभवं विवेक्तुं विशिष्टाः प्रकारोपाधयो भवन्ति। ते च नियमेन विभ्रमविषयविरोधितया निर्धारितस्वभावभेदा गुणादय एव। तदिदं सामान्यतस्तावल्लक्षणसहचरितलक्ष्यविषयज्ञानत्वमेव ज्ञानगतं तज्जातीयत्वमिति प्रत्यक्षे गतिः। यदा त्वप्रत्यक्षे लक्ष्ये लक्षणेन ज्ञानं जन्यते तदा ऽनुमानं तदिति तस्यान्यथैव गतिर्भविष्यतीति। तत्र द्रव्ये गन्धवति पृथिवीज्ञानमित्यादि सामान्यतः,

---

विषयोपाधय एवेति। उपलक्षणमिदं शाब्दज्ञानविषयस्याऽऽप्तोक्तत्वादेस्तज्जातीयत्वेनाग्रे ऽभिधानात्॥ ननु न केऽपि गुणादयो विभ्रमविरोधितया निर्द्धारितस्वभावा अन्ततः स्वप्ने ऽपि तदाऽऽकलनादित्यत आह। तदिदमिति। यत्र च लक्षणवदेव लक्ष्यमन्यत्रारोप्यते तत्र यथा न व्यभिचारस्तथा ऽग्रे वक्ष्यामः। तत्रेति।

करचरणादिमति शरीरज्ञानमिति विशेषतः, गुणेषु केतक्यादौ सौरभज्ञानं, शङ्खादौ श्वेतज्ञानमित्यादि, कर्मणि च वातुलेन तिष्ठता तीव्रवेगासंस्कृतेन चलज्जलादिस्वच्छविलोकनविरहिणा यद्द्रव्यं चलतीत्युपलभ्यते तत्तथेति ॥

एवं तेषु विशेषेषु ते ते विशेषा व्यभिचारविरोधिनो न प्रतिपदमनुक्रमितुं शक्यन्ते। तदेवं तत्त-

---

तत्र तेषु तज्जातीयेषु मध्ये द्रव्ये तावत्तज्जातीयत्वमित्यर्थः। न च गन्धान्तरवति गन्धान्तरवत्त्वज्ञानेषु व्यभिचारः पृथिव्यंशे तेषामपि प्रमात्वात्। ननु करचरणवति शरीरज्ञानत्वादित्यत्र करचरणवत्त्वं नोपलक्षणं व्यावृत्तोपलक्ष्याभावात्। न विषयतया ज्ञानविशेषणं, करचरणवत्त्वप्रकारकज्ञानत्वस्य भ्रमेऽपि सत्त्वात्। इदं शरीरमिति ज्ञाने शरीरत्वप्रकारकतया तदसिद्धेश्च। नापि विषयविशेषणं करचरणवद्विषयकशरीरज्ञानत्वस्य व्यभिचारात् शरीरभ्रमस्यापि वस्तुतः करादिमद्विषयकत्वात्। नापि करादिशून्ये यच्छरीरत्वेन ज्ञानं तदन्यत्वे सतीति विवक्षितं शून्य इत्यत्र विषयत्वं सप्तम्यर्थ इति करादिशून्यविषयकशरीरज्ञानान्यशरीरज्ञानत्वादित्यर्थः, तथा चासिद्धिः शरीरज्ञानस्य तच्छून्यशरीरत्वादिविषयत्वनियमात्। मैवम्। करचरणवद्विशेष्यकशरीरत्वप्रकारकज्ञानत्वस्य लिङ्गत्वात् शरीरभ्रमे करचरणवतः शरीरस्य विशेषणत्वात्। अत्र चक्रवत्

दुपाधिविशिष्टतत्तदनुभवत्वमेव तत्तज्जातीयत्वमिति मन्तव्यम् ॥

तदेवम्भूतस्य ज्ञानस्य विषयनान्तरीयकत्वेनोपाध्यभ्यास एवाभ्यासदशापन्नत्वम् । यत्र तु स एवार्थो भूयोभूयो ऽभ्यस्तस्तत्र संवादवत्त्वमेव तज्जातीयत्वम् । संवादश्च समानासमानजातीयप्रमाणप्रसर इत्यादि प्रागेव दर्शितमिति ।

एवं तावत् बाह्यप्रत्यक्षं समर्थितम् । प्रत्यक्षसमानन्यायतया आगमस्य प्रामाण्यं समर्थयति । एवं चेति ॥ [८।७]

अत्रापि तज्जातीयत्वमाप्तप्रणीतकत्वम् । अभ्यासदशापन्नत्वं पुनरेतस्य भूयोदर्शनेन मन्त्रायुर्वेदे तज्जातीयत्वस्य प्रामाण्याविनाभावसिद्धिः मन्त्रायुर्वेदस्याऽन-

---

भ्रमिं कृत्वा पूर्ववेगप्रभवाग्रिमवेगरूपसंस्कारवता निश्चलमपि चल-मुपलभ्यते तत्र व्यभिचारवारणायोक्तं तीव्रवेगासंस्कृतेनेति ॥

स एवार्थ इति । सैव व्यक्तिरित्यर्थः ॥

ननु प्रत्यक्षप्रामाण्यसमर्थनानन्तरं क्रमानुरोधेनानुमानप्रामाण्यसमर्थनमुचितं तत्किमागमप्रामाण्यं समर्थ्यत इत्यत आह । एवं तावदिति ॥

भ्यासदशापन्नत्वं तदसिद्धिः। यथा च प्रामाण्यं प्रवृत्ति-सामर्थ्येनावधार्यते ऽनभ्यासदशापन्नेषु तथा ऽप्रामाण्य-मपि प्रवृत्तिविपर्य्ययेण। यथा च प्रवृत्तेः प्रागेवाभ्यास-दशापन्नेषु तज्जातीयतया प्रामाण्यमवधार्य्यते तथा ऽप्रामाण्यमपीति मन्तव्यम्। उपाधिविरोधश्च तज्जाती-यत्वं, तदभ्यास एवाभ्यासदशापन्नत्वं, यथा चन्द्रमसि चन्द्रद्वयज्ञानं, शङ्खे पीतज्ञानं, गुडे तिक्तज्ञान,-मित्यादि। तस्मात् सन्दिग्धे प्रवृत्तिसामर्थ्यमव-तारणीयमिति (१)॥

आप्तप्रणेतृकत्वमिति। यद्यप्याप्तत्वं नाविप्रलम्भकत्वं तदुक्ते ऽपि व्यभिचारात्, नाप्यभ्रान्तत्वं सर्वविषयाभ्रान्तेरसम्भवात् भ्रान्तेः पुरुषधर्मत्वात्, यत्र क्वचिदभ्रान्तत्वमनाप्तस्यापि। प्रकृत-विषयाभ्रान्तत्वं चासिद्धम्, नापि गुणवत्त्वं गुणस्यैवानिर्वच-नात्। तथापि वेदे मन्त्रायुर्वेदैककर्तृकत्वं वेदत्वमेव वाऽऽप्तोक्तत्वं अन्यत्र मन्वाद्युक्तस्मृतित्वमेवेति मन्तव्यम्। अनेन मन्त्रेणेदं भव-तीति प्रतिपादको वेदो मन्त्रवेदः चरकादिमूलभूतश्चाऽऽयुर्वेदः। प्रवृत्तिविपर्यय:-प्रवृत्तिविसंवादः। प्रयोगस्त्वेवम्। अयं पृथिवी-त्वेनानुभवः पृथिवीत्वाभाववति पृथिवीत्वप्रकारको गन्धवदविशे-ष्यकपृथिवीत्वप्रकारकनिश्चयत्वादिति व्यतिरेकी॥

---

(१) मवधारणीयमिति २ पु० पा०।

स्यादेतत् । सामर्थ्यं पुनरस्याः फलेनाभिसम्बन्धः अथ फलज्ञानस्यैव कथं प्रामाण्यमवधारणीयमित्यत्र केषाञ्चिन्मतमाह । न चेति । [८।१६] न पुनरुदन्योपशममपि परीक्षत इति-उदन्योपशमज्ञानमपीत्यर्थः ॥

तदेतदनुपपन्नं-फलज्ञानं हि फलस्य सिद्धावस्थस्य साधनानर्हतया निष्प्रयोजनीभूतत्वाद्वा न परीक्ष्यते,—तत्जातीयज्ञानस्य सर्वास्ववस्थास्वर्थाव्यभिचारितया निःशङ्कत्वाद्वेति । न तावदाद्यः फलस्य सिद्धावस्थत्वेन तत्साधनस्यापि निष्प्रयोजनीभूततया ऽपरीक्षितत्वप्रसङ्गात् । उत्तरोत्तरफलाभिसम्बाने(१) तत्साधनं परीक्ष्यत इति चेत् फले ऽप्येवमस्तु । सिद्ध एव हि फले परीक्षिते तत्साधनस्य तथात्वसिद्धावुत्तरफलाभिसन्धिः स्यात् ॥

ननु फलज्ञानस्य परीक्षायां प्रकृते किं दूषणं स्यादित्यत आह । स्यादेतदिति ।

निष्प्रयोजनीभूतत्वादिति । परीक्षायाः प्रवृत्तिफलकतया प्रवृत्तेश्चासिद्धविषयत्वेन सिद्धाविषयकत्वादित्यर्थः ।

निःशङ्कत्वाद्वेति । संशयस्य परीक्षाङ्गत्वादित्यर्थः ॥

उत्तरोत्तरेति । फलार्थिनस्तत्साधनगोचरप्रवृत्तौ साधनपरी-

(१) उत्तरोत्तरफलमभिसन्धाय-इति २ पु० पा० ।

नापि द्वितीयः फलज्ञानस्यापि भूयोभूयः स्वप्नाद्यवस्थासु व्यभिचारदर्शनात्। स्वस्थावस्थस्य फलज्ञानं न व्यभिचरतीति चेत्। एवं तर्हि परीक्षितमेव फलज्ञानं स्यात्। तथाहि यत् स्वस्थावस्थस्य फलज्ञानं तदव्यभिचारीति व्याप्तिसिद्धौ यत्नैव तथाभूतज्ञानत्वं पश्यति तत्रैवाव्यभिचारित्वमवधारयत्यनेनाभिप्रायेणाह।

वयन्त्विति। [८।२४] अस्याप्यभ्यासदशापन्नत्वं-प्रामाण्याविनाभूतलिङ्गोपलम्भस्तथा तज्जातीयत्वं पुनः स्वस्थावस्थस्य फलज्ञानत्वमेव ॥

ननु यद्विज्ञानं दृष्टान्तयितव्यं तस्यापि प्रामाण्यं कथमवधारणीयम्, एवं तत्तत्साधनस्यापि दृष्टान्तपरम्परायाः कथमित्याह। न चेति ॥ [८।२५]

त्वाया हेतुत्वादित्यर्थः। फले ऽपीति। न ह्यपरीक्षिते फले तत्साधननिश्चयाधीना प्रवृत्तिर्भवतीति फलमपि परीक्षणीयं स्यादित्यर्थः ॥

फलज्ञानस्यापीति। स्वप्ने पिपासोपशमनज्ञानस्य भ्रमत्वादित्यर्थः ॥

नन्विदानीन्तनफलज्ञानप्रामाण्यानुमितेः पूर्वफलज्ञानप्रामा-

फलज्ञानस्येत्युपलक्षणम् । तज्जातीयत्वेन लिङ्गेन प्रामाण्ये साधयितव्ये यद्यद्दृष्टान्तीक्रियते तस्य तस्येति मन्तव्यम् ॥

नन्वेवं प्रवृत्तिसामर्थ्यमनवकाशमेव, न ह्यस्ति तद्विज्ञानं यत्सर्वथैवापूर्वविषयं, तथा च प्रमाणतो ऽर्थप्रतिपत्तिप्रवृत्तिसामर्थ्ययोः कथमनादित्वमाह वार्त्तिककार इत्यत आह। एतेषु च मध्य इत्यादि । [६।१]
शङ्कितव्यभिचार-तज्जातीयत्वापरामर्शादिति शेषः ॥

यद्यपि फलं न प्रवृत्तिविषयस्तथापि तत्साधनगोचरायास्तत्सन्तानगोचराया एव वा प्रवृत्तेस्तज्जातीय-

---

स्यानपेक्षत्वात् कथमनवस्थेत्यत आह । नन्विति । अनुमित्यङ्गव्याप्तिग्रहविषयत्वेन तदपेक्षा ऽऽवश्यकीत्यर्थः । न चेतीति । अप्रामाण्यशङ्काकलङ्काभावेन लिङ्गादिज्ञानस्यैवार्थनिश्चायकत्वं तत्कलङ्कत्वनादितैव परीहार इति भावः ॥

अनादित्वसमर्थनं तत्रानुपपत्तिं विना न घटत इति तामाह । नन्वेवमिति ।

ननु प्रमात्वव्याप्यविशेषदर्शने सति कथं शङ्केत्यत आह । तज्जातीयत्वेति ॥

यद्यपीति । प्रवृत्तिजन्यव्यापारविषयस्यैव प्रवृत्तिविषयत्वं न च फलस्य तथात्वमित्यर्थः । तत्साधनगोचराया इति । शङ्कितव्यभि-

फलान्तरसम्बन्धस्तन्नान्तरीयकविजातीयफलसम्बन्धो वा स्वस्य नरान्तरस्य वा प्रवृत्तिसामर्थ्यं फलज्ञानस्य द्रष्टव्यम् ॥

तदेवं समानन्यायतया रूपादिबाह्यप्रत्यक्षप्रामाण्यसमर्थनानन्तरं शब्दप्रामाण्यं समर्थ्य तदुभयोपपत्तये समानन्यायतयैवा ऽऽन्तरप्रत्यक्षज्ञानेषु मध्ये फलज्ञानप्रामाण्यं समर्थितम् । समानन्यायतयैवेच्छाद्वेषप्रयत्नगोचरस्यापि ज्ञानस्य प्रामाण्यसमर्थनं सूचितमित्यनुव्यवसायो ऽवशिष्यते । तस्य चानुमानसमानन्यायतया ऽनुमानप्रामाण्यसमर्थनानन्तरमेव समर्थनं करिष्यत इत्यभिप्रायवानाह । अनुमानस्येति ॥ [८।४]

द्विधा हि व्यभिचारशङ्का कारणतः स्वरूपतश्च । सा

चारफलसाधनगोचराया इत्यर्थः । तत्सन्तानगोचराया इति । शङ्कितव्यभिचारफलसाधनजातीयसाधनगोचराया इत्यर्थः । तज्जातीयेति । शङ्कितव्यभिचारफलजातीयफलान्तरसम्बन्धः तद्व्याप्यतद्विजातीयफलसम्बन्धो वेत्यर्थः ॥

कारणत इति । अनुमितिहेतुव्याप्तिपक्षधर्मताज्ञानाप्रामाण्यशङ्कया कारणतो ऽनुमितावप्रामाण्यशङ्का स्यात् ज्ञानत्वेन वा स्वरूपत इत्यर्थः । तत्राद्यायामाह । सा चेति । अनुमितिहेतुव्या-

च व्याप्तिपक्षधर्मत्वग्राहकैरेव प्रमाणैरपनीयत इति भवति निरस्तसमस्तव्यभिचारशङ्कमनुमितिज्ञानं तस्यैवम्भूतस्य स्वत एव प्रामाण्यं निश्चीयत इति शेषः ॥

प्तिपक्षधर्मताज्ञानप्रामाण्यनिश्चये क्व शङ्केत्यर्थः। स्वत एवेति। स्वग्राहकानुव्यवसायादेवेत्यर्थः। प्रामाण्यमित्यत्रोत्पत्तिज्ञप्तिविशेषजिज्ञासायामाह। निश्चीयत इतीति। निःसन्दिग्धीक्रियत इत्यर्थः ॥

अनुव्यवसायेनानुमितित्वे ऽनुव्यवसीयमाने तद्व्याञ्जकं लिङ्गजत्वमपि ज्ञायते व्यञ्जकाग्रहे जातेरग्रहादिति विशेषदर्शने सत्यप्रामाण्यशङ्का निरस्यते। न हि सल्लिङ्गपरामर्शजानुमितिराभासो भवतीत्यर्थः। यद्वा स्वत एव-सुष्ठु सुतरां वा प्रामाण्यं निश्चीयते कुतः स्वत एव-परत एव। विशेषदर्शनादप्रामाण्यशङ्कानिराकृतविरोधिनिराकृतौ प्रामाण्यानुमितेः सुकरत्वादित्यर्थः। तथा च प्रामाण्यनिश्चयादिवाप्रामाण्यशङ्काविरहादर्थं निश्चित्य निष्कम्पः प्रवर्त्स्यत इति भावः। यद्वा लिङ्गजन्यं प्रामाण्यविषयकमनुमिति रूपं यज्ज्ञानं जायते तस्मिन् प्रमाभूते ऽनुव्यवसीयमाने तद्गतं प्रमात्वमप्यनुव्यवसीयते विशेषणस्य पूर्वं ज्ञातत्वादित्यनुमानस्यानुमितेः फलस्य निरस्ता समस्ता व्याप्त्याद्यभावविषया शङ्का यस्य तस्य स्वत एव स्वग्राहकानुव्यवसायादेव प्रामाण्यं निश्चीयते न त्वनुमितिमात्रस्येत्यर्थः ॥

ननु प्रमाणत्वाविशेषे ऽपि कथमनुमितेरेव स्वतो, न प्रत्यक्षादेरित्यत आह। अनुमेयेति॥ [८।५]

अनुमितिज्ञानं ह्यर्थस्य तथात्वं व्यवच्छिन्ददेवोत्पद्यते वह्निमानेवायमिति, तथा चाऽनुव्यवसायेनानुव्यवसीयमानमिदं स्वस्वार्थावधारणात्मकमेवावसीयते। न चाविपरीतार्थत्वमनुभवस्याऽनभ्यवस्यता ऽवधारणात्मकत्वमस्यावसितं भवति। तथा च तदवश्यमवसेयं, तदेव

"अनुमेयाव्यभिचारी"त्यस्य "व्याप्तिपक्षधर्मताग्राहकै"रित्यनेन पौनरुक्त्यमत आह। ननु प्रमाणत्वेति॥

द्वितीयायां शङ्कायामाह। अनुमितिज्ञानं हीति। अनुमितिरर्थस्या ऽतथात्वं व्यवच्छिन्दन्त्येवोत्पद्यत इत्यत्र मानमाहुः। धूमस्य वह्निव्याप्यत्वं वह्न्यभाववदवृत्तित्वम्। तथा च व्याप्तौ वह्न्यभावाभावस्य भानत्वात् सामग्रीसत्त्वे कथं नानुमितौ तदवभासः। यद्वा प्रत्यक्षं किञ्चिदवधारणात्मकं भवतीत्यत्र तर्कजन्यत्वं प्रयोजकमनुमितावपि तदस्तीति सा ऽप्यवधारणात्मिका। अथवा केवलान्वयिसाधारणी व्याप्तिः साध्यायोगव्यवच्छेद एव तथा च वह्न्यभाववति धूमाभावज्ञाने तद्वृत्तिविषयतया साध्यायोगव्यवच्छेदस्यापि भानमेव यत्रायोगव्यवच्छेदेन व्याप्तिस्तत्रानुमितावपि स भासत इति तामनुमितिमधिकृत्येदमुक्तमिति त्वस्मत्पितृचरणाः॥

च प्रामाण्यम्। कदाचिदेवम्भूतानुव्यवसायेऽपि विपर्यय-त्वशङ्का तदवस्कन्दतीत्यवशिष्यते सा च लिङ्गसमुत्थ-त्वादेव नास्ति, न हि विशेषदर्शनग्रस्तोत्पत्तौ शङ्काऽव-काशः, तदेतदाह। न हीति ॥ [८।६]

लिङ्गाकारं विज्ञानं-निश्चिताव्यभिचारमिति शेषः।

प्रत्यक्षशाब्दज्ञाने तु नायोगव्यवच्छेदात्मके, अपि त्वारोपानारोपसाधारणविषयावभासिनी, तथा चानु-व्यवसायेनापि तथैवानुभूयेते, न त्ववधारणात्मकतयेति नोभयोः स्वतः प्रामाण्यग्रहः। अथ दैवादयोगव्यवच्छेदा-त्मके एवोत्पद्येते अनुव्यवसीयेते च, तदा च नियामक-मन्तर्भाव्यैव, तदभावे त्वविशेषादवधारणात्मत्वं परिभूय

तदवश्यमिति। तत्-अविपरीतार्थकत्वम्। ननु अविपरीतार्थ-त्वमनन्यव्यावृत्तविषयत्वं तच्च न प्रामाण्यमनुमित्याभाससाधा-रण्यात् निर्विकल्पकस्याप्रमात्वप्रसङ्गाच्च तस्याऽतद्व्यावृत्तविषय-त्वादित्यत आह। कदाचिदिति। यद्यप्यनुमित्याभासे ऽप्यनुव्यव-सायेन तदुल्लिख्यते तथापि तच्छङ्का सल्लिङ्गसमुत्थत्वविशेषदर्शना-न्नास्तीत्यर्थः। अनुमितौ लिङ्गसमुत्थत्वभाने हेतुरुक्त एवेति भावः॥

नन्वेवं लिङ्गाभासोच्छेदप्रसङ्गोऽत उक्तं निश्चितेति। नियामकं-व्याप्यमित्यर्थः। अविशेषात् -विशेषादर्शनात् इत्यर्थः।

तद्तद्रूपसाधारणमेवावतिष्ठेत इत्याशयवान्नियामका-भावमेवाह। प्रत्यक्षज्ञानं त्विति। [६।१८]

धूमादियुक्तधूमध्वजादिज्ञाने हि यद्यप्यर्थस्याप्यर्थेना-व्यभिचारोऽस्ति, यद्यपि चार्थादपि तथाभूतादेव तज्-ज्ञानं जायते, तथाऽप्यव्यभिचारो वा तद्ग्रहो वा प्राक्तनस्तत्राकिञ्चित्कर एव, इन्द्रियापातमात्रादेव युग-पदुभयोरप्येकज्ञानावभासितया परामर्शकालानपेक्ष-णात्। अपरामृष्टस्य चानियामकत्वात्। तदिद-

---

ननु यत्र नियामकान्तर्भावेनावधारणात्मकमेव प्रत्यक्षज्ञानं तत्र विशेषदर्शनप्रभवतया संशयानाक्रान्तत्वात् स्वतः प्रामाण्यग्रहो ऽस्त्वित्यत आह। धूमादियुक्तेति। इन्द्रियापातेति। उभयेन्द्रिय-सन्निकर्षघटितसामग्रीसमाजादुभयविषयकं तत्र प्रत्यक्षमुत्पद्यते न तु व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यत्वं तत्राग्निज्ञाने ऽस्तीत्यर्थः। अपरामृष्टस्य चेति। व्याप्यत्वेन चाऽभातस्यानियामकत्वात्— संशयानास्कन्दकत्वादित्यर्थः। यत्र च स्थाणुपुरुषसन्देहानन्तरं करचरणादिविशेषदर्शनात् पुरुष एवायमित्यवधारणात्मिका धीः, तत्रापि न स्वतः प्रामाण्यग्रहः करचरणादेर्व्याप्यत्वेनाभाने संशयानादवधारणात्मकत्वानुपपत्तेः, व्याप्यत्वेन तु भाने परा-मर्शसद्भावादनुमितिरेव तत्र जायते, प्रत्यक्षसामग्रीतो अनु-मितिसामग्र्या बलवत्त्वात्, अन्यथा परामर्शानन्तरं धारावाहिकं

मुक्तम्—अपि तु सत्तामात्रेणावस्थितादिति । [६।६]
अव्यभिचारिणो ऽपीति शेषः ॥

एतेन शङ्कामात्रमपनीयते ज्ञानान्तरैरिति यदुक्तं कैश्चित्तन्निरस्तम् । शङ्का हि संशय एवाभिधीयते, स च तत्त्वनिर्णयव्यतिरेकेणा ऽपनेतुमशक्य एवेति तत्त्व-निर्णयोपायो ऽनुसर्तव्यः । तथा च ज्ञानस्वरूपग्राहिणः कोऽण्ठा प्रत्यक्षाद्यन्तराभावे चानुमान(१) एवोपाय इति तदाह । प्रवृत्तिसामर्थ्यमिति ॥ [६।१३]

स्यादेतत् । यदि प्रत्यक्षशाब्दज्ञानयोः परतः प्रामाण्यं तत्किमनुव्यवसायस्यापि परत एव, तथा च लिङ्गं निश्चितमेव निश्चायकमित्यनेन न्यायेन लिङ्गा-

परामर्शान्तरमेव स्यादिति मतमाश्रित्येदमुक्तम् । व्यभिचारिणि प्रत्यक्षे सत्ताव्यवस्थितस्यापि नाव्यभिचारित्वमतः शेषमाह । अव्यभिचारिणो ऽपीति । शेष इति ।

शङ्कामात्रमिति । न तु प्रामाण्यमपि गृह्यत इति मात्रार्थः । स्वरूपग्राहिण इति । अनुव्यवसायस्य प्रामाण्यग्रहणसामर्थ्य इत्यर्थः । प्रत्यक्षादीत्यादिशब्दाच्छब्दपरिग्रहः ।

ननु चागृहीतप्रामाण्य एवानुव्यवसायो लिङ्गं निश्चाययतु कुतो ऽनवस्थेत्यत आह । स्यादेतदिति । यद्यपि लिङ्गनिश्चयः

(१) अनुमानमितियुक्तं भाति ।

न्तरपरम्पराज्ञानमनवस्थामवतारयतीत्यत आह । ज्ञान-गतेति । [६।११३]

अत्रापि सैव युक्तिरतद्रूपव्युदासेनैव स्वविषयमालम्ब्यैवोत्पत्तेस्तथैवानुभवः, उत्पत्तेरेवाऽऽरभ्य विशेषग्रहणग्रस्तत्वाच्च न शङ्कावकाशः । विशेषश्चानुव्यवसायत्वमेव, न ह्यजानन्नपि कश्चिज्जानामीत्यनुव्यवस्यति, न च शुक्तिकाकारे ज्ञाने रजतं जानामीति स्यादिति तदिदमुक्तम् । तादृशस्येति ॥ [६।११५]

चक्षुरादित एव, तथापि तज्जनितलिङ्गज्ञानप्रामाण्यसंशयाहितलिङ्गसंशयान्नानुमितिः स्यात् । यद्यगृहीतप्रामाण्यमेव ज्ञानं निश्चायकं तदा व्यवसायो ऽप्यगृहीतप्रामाण्य एव स्वविषयं निश्चाययतु तत्किं प्रामाण्यग्रहणेनेति तस्यापि प्रामाण्यानुसरणे कारणतो ऽनवस्थेत्यर्थः ॥

युक्तिमेवाह । अतद्रूपेति । येनानुव्यवसायेन प्रामाण्यं विषयीकृतं तस्मिन्न तु व्यवसाये ऽनुव्यवसीयमाने प्रामाण्यमपि तन्निष्ठं पूर्ववदेव गृह्यते । यद्वा ज्ञानानुव्यवसाये व्यवसायविषयस्य प्रतियोगिनो-ऽवश्यं भानात्तद्व्यावृत्तिरवश्यं भासत इति सो ऽप्यनुव्यवसायो येनानुव्यवसीयते तेनातद्व्यावृत्तविषयक एवानुव्यवसीयत इति पूर्वोक्तरीतिरित्यर्थः । न हीति । न च सुखादौ ज्ञानत्वेनानुव्यवसायो भ्रमरूपो ऽस्तीति वाच्यम् । सुखत्वादेराश्रयमात्रव्यङ्ग्यतया सुखादौ

उपलक्षणं चैतत्। सबाह्याभ्यन्तरं धर्मिमात्रगोचरमपि प्रत्यक्षं स्वत एव प्रमाणं, विभ्रमस्यापि निरालम्बनस्य क्वचिदनुपपत्तेरिति। उक्तयुक्तिं हृदि निधायातिदिशति। एतेनेति ।[६।१६] उपमान मुपमितिरित्यर्थः। व्याख्यातं-स्वतोऽवधार्यं प्रामाण्यतयेत्यर्थः। न

साक्षात्क्रियमाणे सुखत्वस्यापि ग्रहापत्त्या विशेषदर्शनेन साक्षात्कारिभ्रमानुपपत्तेः। यैस्तु सुखं ज्ञानमित्यभ्युपगम्यते तेषामौपपत्तिकभ्रमो न साक्षात्कारीत्यर्थः। न चेति। भ्रमे ऽप्यनुव्यवसायेन रजतत्वादिकं व्यवसायप्रकारकत्वेनोल्लिख्यते तच्च तथैवेति भावः॥

सबाह्याभ्यन्तरमिति। ज्ञानस्य धर्मिविषयत्वे ऽनुव्यवसीयमाने प्रामाण्यग्रह इवाप्रामाण्यशङ्का मास्तीत्येव स्वतः प्रामाण्यग्रहार्थः। धर्मिणि भासमाने व्यावृत्त एव भासत इति नियमाभावादिति भावः।

अत्रेदं तत्त्वम्। अगृहीतप्रामाण्यमेव ज्ञानं परप्रामाण्यं निश्चाययति अप्रामाण्यशङ्काविरहात्। यत्र तु प्रामाण्यवृत्तावप्रामाण्यशङ्कया प्रामाण्ये संशयस्तत्र प्रामाण्यज्ञानप्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः एवं यावदप्रामाण्यशङ्का ऽनुवर्तते तावत् ज्ञानप्रामाण्यनिश्चयादेव प्रामाण्यनिश्चयः। न चैवमनवस्था चरमप्रामाण्यज्ञानस्य ज्ञानाभावात्। कोटिस्मरणाभावेन विषयान्तरसञ्चारेण वा प्रामाण्यसंशयानवस्थाभावात्।

ह्यतिदेशवाक्यार्थज्ञानसादृश्यज्ञानयोः प्रामाण्ये निश्चिते उपमितिराभासीभवति। यद्यपि चानुमानोपमानानुव्यवसायधर्मिज्ञानानामपि प्रामाण्यं परतोऽपि शक्यग्रहमेव, सन्ति हि तत्र यथायोगं लिङ्गसादृश्यज्ञानसमुत्थत्वादीनि तज्जातीयत्वलिङ्गानि, तथापि कोष्ठगत्या स्वत एव प्रामाण्यग्रहोऽत्र सुकर इति स एव दर्शितः। विप्रतिपन्नं प्रति तु परत एव साधनीयं

अन्यथा ज्ञानानुमितिग्राह्यत्वेऽपि प्रामाण्यस्यानवस्था स्यात्। लिङ्गज्ञानप्रामाण्यानुसरणावश्यम्भावात्। स्वप्रकाशत्वेऽपि ज्ञानस्य प्रामाण्यस्य स्वग्राह्यत्वं न स्वग्राह्यं स्वरूपप्रामाण्याभ्यामन्यत्वात्। किं तु प्रामाण्यस्य परतो वेद्यतायामनवस्थानात् परिशेषानुमानेनान्येन मानेन वा ग्राह्यम्। तथा च तत्प्रामाण्यस्यापि स्वग्राह्यत्वमन्येनेत्यनवस्थापत्तिरिति॥

उक्तयुक्तिमेव दर्शयति। न ह्यतिदेशेति। अतिदेशवाक्यप्रयोक्तुराप्तत्वे निश्चित एवोपमानावतारात् प्रमाणभूतवाक्यार्थज्ञानसादृश्यज्ञानजन्यत्वे निश्चितेऽप्रामाण्यशङ्कानवतारात्। यद्वा गौरवेणेतरेषामप्रवृत्तिनिमित्तत्वेऽवधारिते प्रतियोगिग्रहात् तद्व्यतिरेकग्रह इत्युपमितेरप्यवधारणात्मकत्वादित्यर्थः। कोष्ठगत्या वस्तुगत्येत्यर्थः। स्वत एवेति। अनुव्यवसायेनेत्यर्थः। विप्रतिपन्नं प्रतीति। अनुमितिप्रामाण्यविप्रतिपन्नं प्रति पञ्चावयवप्रयोग-

तदिति परमार्थः । अतः स्वत एवेत्यवधारणं नायोगव्यवच्छेदे, नाप्यन्ययोगव्यवच्छेदे, किं तर्हि ? अत्यन्तायोगव्यवच्छेद इति ॥

नन्वेतावताऽपि विज्ञानकारणानामिन्द्रियादीनां प्रामाण्यस्य कुतः सिद्धिरित्यत आह । संवेदनस्य चेति ॥ [६।१६]

नन्विन्द्रियादयो यद्यर्थव्यभिचारिणः कथमर्थधियमव्यभिचारिणीं जनयेयुः, तथात्वे वा रासभो ऽपि वह्निधियमव्यभिचारिणीं जनयेत् अविशेषादित्यत आह । न चेति । [६।१८] यथाऽऽर्द्रेन्धनं दहनव्यभिचार्यपि दहनसम्बन्धाद्दहनाव्यभिचारिणं धूमं जनयन्न नियोगपर्यनुयोगावर्हति कारणस्वाभाव्यात्, तथेन्द्रियाद्यप्यर्थ-

---

नैव मध्यस्थावगमविषयस्य अनेनानुमितिसामग्री सम्पादितेत्येतस्य निर्वाहात् स्वप्रकाशताभिधाने ऽर्थान्तरत्वप्रसङ्गादित्यर्थः । एवं सति स्वत एवेत्यनेन विरोधं परिहरति । स्वत इति । विप्रतिपन्नं प्रति स्वतस्त्वासिद्धेर्नायोगव्यवच्छेदः, परतो ऽपि सिद्धेर्नान्ययोगव्यवच्छेदे ऽवधारणमित्यर्थः । अत्यन्ता ऽयोगेति । कुत्रापि स्वतो गृह्यत इत्यर्थः ॥

नन्वर्थव्यभिचारिणो ऽप्यर्थाव्यभिचारिज्ञानजनने को विरोध इति शङ्काबीजमाह । नन्विति ।

व्यभिचार्य्यपि तथाविधसहकार्यपेक्षं तेनार्थेन सम्बन्धात् तदर्थाव्यभिचारि ज्ञानं जनयेदित्यर्थः ॥

तदेतत्प्रामाण्यं नावश्यं सर्वत्रावधार्यते तदाश्रयस्यैव संवेदनस्य सर्वत्रानवधारणात्, तथा सति चानवस्थायां विषयसञ्चारो न स्यात् । तस्मात्तीव्रसंवेगितया यत्संवेदनमवश्यं वेदनीयं यत्र यत्र चापरो विप्रतिपद्यते जिज्ञासते च, तत्र तत्र प्रामाण्यमुक्तेनोपायेनावधारणीयमित्यतो नानवस्थेत्याशयवानुपसंहारव्याजेनोक्तमर्थं सङ्कलय्याह । तस्मादर्थसन्देहादिति ॥ [८।२०]

नन्वर्थानिश्चयेनापि प्रवर्त्तमानो न हि तत्साधनतामनजुमाय प्रवर्त्तितुमर्हति अर्थित्वाभावात्, न चाहितसाधनत्वानुमानं(१) व्याप्तिग्रहणं विना, न च सो-

नन्वन्योन्याश्रये परिहृते ऽप्यनवस्था तदवस्थैवेत्यत आह । तदेतदिति । धर्मिज्ञाने सति तत्प्रामाण्यानुसरणे अनवस्था तदज्ञाने तु तदभावात् क्वानवस्थेत्यर्थः । तीव्रसंवेगितयेति । ज्ञानसामग्रीनियतोत्पत्तिकत्वं ज्ञानस्य तीव्रसंवेगित्वं तच्च न सर्वत्र ज्ञाने ऽस्तीत्यर्थः ॥

ननु चार्थसन्देहादपि प्रवृत्तः क्व परस्पराश्रयत्वमित्यत आह ।

(१) न च तत्साधनत्वानुमानम् इति साधुः ।

ऽपि प्रवृत्तिं विनेति तदवस्थमेवेतरेतराश्रयत्वं नायो यत आह । अर्थस्येति ॥ [६।२४]

यद्यपि प्रामाण्यानिश्चयवदपेक्षितोपायताऽनिश्चयेऽपि तत्र तत्र ते प्रवर्त्तन्ते तथाऽप्यपेक्षितोपायतां पाक्षिकीमप्युररीकृत्य प्रवृत्तिः । न च तत्संशयस्तस्यामनुपलब्धायामन्यत्रापि स्यादतः पुनरुपलब्धिरायातेत्यतो ऽनादितामादायैव परिहृतम् । "अर्थप्रतिपत्ति"रिति वार्त्तिके, यद्यप्यर्थशब्दो ऽपेक्षितोपायमेवाह तस्यैव प्रवृत्तिविषयत्वादर्थ्यमानत्वाच्च, तथाऽपि धर्मिमात्रप्रतिपत्त्यनुमेयप्रतिपत्त्योर्भिन्नकालत्वादपेक्षितत्वात् च तथैव व्याचष्टे । अर्थप्रतिपत्तिरिति ॥ [१०।१]

(इति प्रमाणत इत्यादिवाक्यस्थप्रवृत्तिसामर्थ्यादिति हेतुविवरणतात्पर्यव्याख्याव्याख्यानम् ।

नन्विति । तथापि धर्मीति । धर्मिस्वरूपमप्रतीत्य तत्रापेक्षितोपायताऽननुमानादपेक्षितोपायताबुद्धेः प्राक्तनी धर्मिस्वरूपप्रतिपत्तिरित्यर्थः । अर्थ्यत इति व्युत्पत्त्या ऽर्थशब्देनापेक्षितोपाय एवोच्यते न तु पूरणं गौरवादिति भावः ॥

(इति प्रमाणत इति भाष्यगतप्रवृत्तिसामर्थ्यादिति हेतुविवरणतात्पर्यव्याख्या-व्याख्या-व्याख्यानम् ।)

ननु प्रमाणस्य प्रयोजनवत्त्वमाक्षिप्तं समाधीयेत जिज्ञासितं वा ज्ञाप्येत। न तावदाद्यः। न ह्यस्ति पुरुषो यः प्रमाणं निष्प्रयोजनमिति ब्रूयात् तन्मूलत्वात् सर्वपुरुषार्थसिद्धेः यस्य तु पुरुषार्थो नास्ति स निरुच्छ्वास एव जीर्येत। नापि द्वितीयः तस्य संशयादिवत् सूत्रपाठानन्तरमेव ज्ञापयितुमुचितत्वादित्यत आह। तत्त्वेदमिति॥ (१) [१०१५]

नेयं प्रमाणप्रयोजनजिज्ञासा, किन्नाम? शास्त्रार्थीभूतस्य परमन्यायस्य निःश्रेयसं प्रति गुरूपायत्वं मन्य-

ननु प्रमाणमर्थवत् प्रयोजनवदिति सिद्धान्तस्वरसात् प्रमाणस्य प्रयोजनाक्षेप एव युक्तस्तत्किं प्रवृत्तिव्युत्पादनाक्षेपेणेत्यत आह। नन्विति। निरुच्छ्वासो निरीहः इष्टसाधनताज्ञानं विना प्रवृत्त्यभावादिति भावः। तस्य संशयादिवदिति। यथा संशयादेः सूत्रपाठानन्तरं प्रयोजनमुक्तं तथा प्रमाणस्यापि तदनन्तरमेव तद्बोधयितुं युक्तं प्रथमं तज्जिज्ञासाया एवाभावादित्यर्थः॥

किन्नामेति। लघूपायसम्भवे गुरूपाये प्रवृत्त्यभावात् तदुपदेशस्याननुष्ठानलक्षणाप्रामाण्यादत एव श्रुतस्वर्गफलत्वेऽपि ज्योतिष्टोमादौ फलभूयस्त्वं कल्प्यत इत्यर्थः। यद्यप्येतावताऽप्यनुसन्धानवाक्यत्वमेव आदिवाक्यस्य स्यात् तथापि पूर्वमशक्यानुष्ठानोपायत्वशङ्कानिरासेनानुसन्धानमुक्तमिदानीं तु गुरूपायत्वशङ्कानिरा-

(१) मुद्रिततात्पर्यटीकायाम् अत्रेदमाशङ्कते इति पाठः।

मानेन लघीयसि प्रवृत्त्युपाये विद्यमाने शास्त्रारम्भ एवा-क्षिप्यते स च समाधातुमारब्ध इत्यर्थः। आत्मनो याथात्म्यं-सकलोपाधिविनिर्मुक्तत्वं तस्य भावनं-ध्यानम्। आदिग्रहणेन तु तदुपायभूताः प्रवृत्तयो यमनियमा-सनप्राणायामधारणालक्षणा गृह्यन्ते। आत्मतत्त्वसाक्षा-त्कार इति समाधिः। वैराग्यं परमो वशीकारः। परिपाकः-सकलक्लेशवासनानिर्मोषः (१)। एतेन साङ्गोपाङ्गो योगो दर्शितः।

सेनेति प्रकारभेदात् तात्पर्यान्तरमाहेत्युक्तमिति भावः। टीकायां दुःखसंज्ञाभावनमित्यत्र शरीरादिषु दुःखसंज्ञा दुःखसम्बन्धित्वेन भावनं सम्यक्ज्ञानं न दुःखत्वेन ज्ञानं तस्य भ्रमत्वादित्यर्थः। याथात्म्यं यदि स्वरूपं तदा ऽहं सुखीति ज्ञाने ऽप्यनिदिध्यासन-दशायामस्तीति व्याचष्टे। सकलेति। उपाधिरागन्तुको धर्मः तेनात्मत्वस्य भाने ऽप्यविरोधः। ननु भावनं चिन्तनं न प्रवृत्ति-स्तथा च प्रवृत्तिभ्य इति सामानाधिकरण्यमयुक्तमित्यत आह। ध्यानमिति। ध्यायते ऽनेनेति व्युत्पत्त्या निदिध्यासनरूपा प्रवृत्ति-रुक्तेति नोक्तदोष इत्यर्थः। ननु साक्षात्कारो ऽपि न प्रवृत्तिरित्यत आह। समाधिरिति। अत्रापि करणव्युत्पत्त्या निरूपाध्यात्म-साक्षात्कारकारणात्ममनःसंयोगरूपः समाधिरुक्तः स च प्रवृत्ति-

(१) सवासनक्लेशनिर्मोक्षः पा० २ पु०।

तथापि न्यायस्य गुरूपायत्वं न परिहृतं न्यायनिर्णीतस्यापि प्रवृत्त्यपेक्षणात् प्रवृत्तस्य तु न्यायानपेक्षणादित्यत आह । एतदुक्तं भवतीति ॥ [१०।१५]

ननूभयोरपि तुल्यत्वे कुतो विशेषात् प्रमाणमेव व्युत्पाद्यते न प्रवृत्तिरित्यत आह । तथापीति । [१०।१८] श्रवणमनननिदिध्यासनसाक्षात्कारलक्षणायाः प्रवृत्तेः स्वरूपतः फलतश्च प्रमाणान्तर्भूतत्वात् तद्व्युत्पादनमेव प्रवृत्तिव्युत्पादनम् । न च प्रवृत्तिव्युत्पादने प्रमाणं व्युत्पादितं भवति । न हि प्रवृत्तिः फलं प्रमाणं तत्स्वरूपं वेत्यर्थः ॥

रेवेत्यर्थः । एतेनेति । ध्यानमारभ्य सवासनक्लेशनिर्मोचिणेत्यर्थः । अङ्गं ध्यानमुपाङ्गं यमनियमादि, आत्मतत्त्वसाक्षात्कारपदेन समाधिरूपो योग उक्तः ॥

गुरूपायत्वमेवाह । न्यायेति । प्रवृत्त्यनन्तरं न्यायानपेक्षायामपि प्रवृत्त्यर्थं तदपेक्षा ऽस्त्येवेति मूलकारणतया न्यायो ऽपि बलीयानिति सो ऽप्यवश्यं व्युत्पाद्यत इति परिहारार्थः ॥

ननु प्रमाणव्युत्पादने समर्थिते किं तथापीत्यादिनेत्यत आह । ननूभयोरिति । स्वरूपतः फलतश्चेति । श्रवणादिप्रवृत्तीनां प्रमाकरणत्वेन क्वचित्प्रमाणत्वं प्रमाजन्यत्वेन च प्रमात्वमिति प्रमाणव्युत्पादनेन तासामपि व्युत्पादनं, प्रमाणस्य फलनिरूप्यतया प्रमाणव्युत्पादनेन फलमपि प्रवृत्तिर्निरूपिता, प्रवृत्तिनिरूपणेन तु न

ननु शास्त्रार्थस्य प्रयोजनव्युत्पादनावसरे प्रमाणमर्थवदिति कुतः, न हि प्रमाणं शास्त्रार्थोऽपि तु न्याय इत्यत आह । सामान्याभिधानं चेति ।

(इति द्वितीयमादिवाक्यस्य तात्पर्यव्याख्याव्याख्यानम् ।)

तदनेन प्रबन्धेन निष्प्रयोजनत्वाऽशक्यप्रयोजनत्वाऽनभिमतप्रयोजनत्वोपायगौरवशङ्काः परिहृताः तत्किमपरमवशिष्यते यदर्थं लोकवृत्तमनूद्यत इत्यतः प्रथमं तात्पर्यमनुस्मारयन्नेव वार्त्तिकमवतारयति । प्रामाण्येति ॥ [१०।२०]

प्रमाणं निरूप्यते अप्रवृत्तेरपि प्रमाणत्वात् प्रवृत्त्यफलस्यापि प्रमाणत्वात् । स्वरूपतः फलतश्च प्रवृत्तावनन्तर्भूतत्वात् प्रमाणस्येत्यर्थः । न हीति । प्रत्यक्षादीनामपि न्यायव्युत्पादनपरतयैव शास्त्रव्युत्पादनादिति भावः ॥

(इति द्वितीयमादिवाक्यस्य तात्पर्यव्याख्या-व्याख्या-व्याख्यानम ।)

ननु लोकवृत्तानुवादपरत्वे सति कुतोऽनुसन्धानपरत्वमुच्यते पूर्वोक्तानुवादश्च किमर्थं इत्यत आह । तदनेनेति । किमपरमिति । का शङ्का निवर्त्तनीया, किं चानवगतं बोधनीयमित्यर्थः । न च प्रमाणादर्थमवधार्य प्रवृत्तः फलं लभत इति लोकवृत्ते ऽनूदिते

अप्रमाणेनेत्यत्रापि यद्यपि वाङ्मनसविसंवादः निषेधविध्युपाय (१) एव हि प्रमाणं तस्मान्निषेधोपायतां जानतो ऽप्यप्रमाणेन निषेधामीति वचनं मनोविसंवाद्येव, तथापि व्यामोहादप्युपपत्तेरेवम्भूताभिप्रायस्थैर्ये ऽपि नास्माकं काचित् क्षतिरित्यनुक्त्वैवोत्तरं दत्तं वाङ्मनसयोर्विसंवाद इति । प्रामाण्याग्रहे प्रमाणेनेत्येव वक्तुं न शक्यते ततः प्रमाणेनेत्येवं वदतो ऽवश्यं प्रामाण्यं मनसि विपरिवर्त्तते तथा चागृहीतप्रामाण्येनेति वचनं मनोविसंवादीत्यर्थः । लोकवृत्तमबाधितो व्यवहार इत्यर्थः ॥

ननु "प्रमाणेन खल्वयं ज्ञाते"त्यादि भाष्यं लोक-

मुमुक्षुर्मोक्षोपाये प्रमाणे प्रवर्त्तेत इत्येव फलमिति वाच्यम् । प्रथमसूत्रादेव तत्प्राप्तेरिति भावः । वार्त्तिके च वाशब्दो नाऽनुसन्धानापेक्षया ऽपि तु तत्प्रकारापेक्षयेति द्रष्टव्यम् ॥

व्यामोहादपीति । अप्रमाणमेव निषेधोपाय इति विद्वांस्तेनैव निषेधामीति भ्रमादित्यर्थः । प्रमाणमेव निषेधोपाय इति ज्ञात्वा यद्यप्रमाणेन निषेधति तदा तु वाङ्मनसविसंवाद इति भावः । बाधितो लोकव्यवहारो नानुसरणीय इति विशेषयति । अबाधित इति ॥

(१) निषेधविध्यन्यतरोपाय इति पा० २ पु० ।

वृत्तानुवादो ऽस्तु, "प्रमाणत" इत्यादि पुनः कथमित्यत आह। कारणप्रदर्शनद्वारेणेति। [१।१।३] न हि लोकवृत्तं स्वरूपेणोपयुज्यते। किं तु? तस्यावश्याभ्युपेयतया तदुपायोऽप्यवश्याभ्युपेय इत्यनेनाभिसन्धिना सोपायमेव तदनूद्यत इत्यर्थः॥

(इति आदिवाक्यस्यैव तृतीयं तात्पर्यव्याख्याव्याख्यानम्।)

आगामिभाष्ये हेयादीनां स्फुटत्वात् तस्येदानीमक्षरार्थो व्याक्रियत इति मा शङ्किष्ठा इत्याह। अस्यैवेति। [१।१।४] वार्त्तिकसम्बद्धो ग्रन्थो ऽर्थपदानीत्याकारो वार्त्तिकग्रन्थस्तस्य तादृश एव। भाष्यगतो भाष्यसम्बद्धो ग्रन्थः तस्येत्यर्थः॥

ननु लोकवृत्तकारणमादिवाक्येनानूद्यत इति लोकवृत्तानुवादो वेति वार्त्तिकविरुद्धमित्यत आह। नन्विति॥

कारणप्रदर्शनोपयोगार्थमाह। न हीति। शङ्काहेतुमाह। स्फुटत्वादिति। तत्पदार्थसंवादाद्व्याख्यानशङ्का स्यादित्यर्थः। मा शङ्किष्ठा इति। आदिवाक्यव्याख्यानस्यासमाप्तत्वादग्रिमभाष्यव्याख्यानानुपपत्तेरिति भावः। वार्त्तिकग्रन्थेति विशेषणवैयर्थ्यमपाकरोति। वार्त्तिकेति। ननु भाष्यगतस्य वार्त्तिकग्रन्थस्येति अन्वयो न युक्तः वार्त्तिकग्रन्थस्य भाष्यगतत्वाभावादित्यत आह। तादृश एवेति।

अभिधेयानां पौर्वापर्यनियमाय गुणप्रधानभावे जिज्ञास्यमाने अभिधानरूपस्य शास्त्रस्य कः प्रस्ताव इत्यत आह। शास्त्रशब्द इति॥ [११७]

एवं तर्हि हेयादीनां शास्त्रार्थरूपतया न पृथक्कोटित्वं तथा चैककोटिकतया किमपेक्ष्य गुणप्रधानभावचिन्तेत्यत आह। अत चेति।[११८] "कथं पुनरनेन प्रमाणादिचतुर्वर्गोऽत्र लभ्यत" इति वार्त्तिकमनुक्तोपालम्भो माभूदित्यत आह। तेनेति। [११९]

तन्मूलत्वादितरसिद्धेरिति। [१११४] सिद्धिः प्रतीतिर्निष्पत्तिश्च। तत्र हेयोपाययो प्रतीतिरेवाधिगन्तव्यस्य तु

अर्थपदानीत्याकार एव, भाष्यसम्बद्धो ग्रन्थो भाष्यग्रन्थः तदेकदेशः तद्गतस्य तु चत्वारि पुरुषार्थस्थानानीत्यर्थः॥

शास्त्रपरत्वे ऽनुपपत्तिमाह। अभिधेयानामिति। "ग्रहणकवाक्यं विवृणोती"त्यतः प्रागेव "उपायः शास्त्र"मिति व्याख्यानं टीकायां शास्त्राभिधेयानां चतुष्टोपपत्तय इति साम्प्रदायिकाः॥

"चेनेति" टीकायां चकारेण सूचयति वार्त्तिककार इत्यर्थः। "कथं पुनरनेनेति" वार्त्तिके अनेन-आदिवाक्येनेत्यर्थः। 'अर्थपदसूचित" इति टीकाया आदिवाक्यस्यार्थपदसूचित इत्यर्थः। हेयादीनां वार्यमाणतया ऽर्थपदवाच्यत्वे ऽपि न हेयादित्वेन वाच्यतेति सूचित इत्युक्तम्।

प्रतीतिर्निष्पत्तिश्च । यद्यपि हानस्य प्रमाणरूपस्य प्रतीतिरस्त्येव तथापि प्रमाणादेवेतीतरेत्युक्तम् । निष्पत्तिस्तु हानस्याज्ञातादेव (१) यस्मात् किं तज्ज्ञानेन, ज्ञानात् तु यस्मात् तस्य प्रमाणायत्तत्वमेवेति भावः । प्रमात्रादिचतुर्वर्गे तु प्रमातृप्रमेययोः सिद्धिः प्रतीतिरेव, प्रमायाश्च निष्पत्तिरपीति तदिदमुक्तं प्रमायाश्च तत्कार्यत्वादिति ॥ [११।१७]

ननु प्रमात्रादीनामपि प्रयोजनवत्त्वादर्थवदित्यनेन किं प्रमाणस्याधिक्यमाहितमित्यत आह । अतिशायने मतुबिति ॥ [११।१५]

नन्वस्य चतुर्वर्गद्वयस्य निःश्रेयसाधिगमं प्रति विकल्पः समुच्चयो वा, उभयमप्यनुपपन्नमभिन्नत्वात्,

---

यद्यपीति । एवं च यतः प्रवृत्तिस्तदेव प्रधानतया वाच्यं न तु मा प्रमाणादेवेति भावः । तथापीति । तथा च प्रमाणस्यैव प्रथम मुद्देशो युक्त इत्यर्थः । न च "तदितरप्रतिलम्भा"दित्यागामिटीकया विरोधः तच्च—प्रमाणं इतरच्चेति तदितरे, तयोः प्रतिलम्भादिति तद्व्याख्यानादिति भावः । प्रतीतिरेवेति । प्रमातृप्रमेययोः प्रमाणाजन्यत्वादित्यर्थः । निष्पत्तिरपीति । अपिशब्दात् प्रतीतिरपि ॥

विवक्षाभेदेनेत्यस्य तात्पर्यमाह । नन्वस्येति । ननु विवक्षा-

(१) हानस्याज्ञानादेव इति २ पा० पु० ।

वचनभङ्गिभेदमात्रेण (१) तदनुपपत्तिरित्यत आह। विवक्षाभेदेनेति। [११।१८] अनेन निमित्तभेदमभिप्रैति तेनायमर्थः—

यद्यप्युभयत्रापि षोडशैव पदार्थाः सङ्गृहीतास्तथापि यथा प्रमाणत्वेन प्रमाणं ज्ञेयं तथा ज्ञानत्वेनाऽपि, अन्यथा ज्ञानान्तरमनुश्रियेत, निरर्थकं च प्रमाणं स्यात्, प्रमाणत्वे चाज्ञाते ज्ञानता न निर्वहेत्। यथा च स्वरूपेण संशयादयो ज्ञेयाः प्रमाणपरिकरत्वात्, तथा ज्ञानोपायतयाऽपि, अन्यथोपायान्तरमनुश्रियेत, निरर्थकाश्चैते स्युः, परिकरत्वे चाज्ञाते उपायता न निर्वहेत्। यथा

यामेव किं कारणमित्यत आह। अनेनेति। विवक्षाभेदप्रयोजकमिति शेषः। उभयत्रापि-चतुर्वर्गद्वये ऽपीत्यर्थः। किमर्थं ज्ञानान्तरानुसरणमित्यपेक्षायामाह। निरर्थकं चेति। न्यायजन्यं तत्त्वज्ञानं ज्ञानं तदन्यस्य प्रमाणप्रयोजनस्याभावादित्यर्थः। प्रमाणत्वे चेति। ज्ञायते ऽनेनेति व्युत्पत्त्या प्रमासाधनं ज्ञानमुच्यते तथा च प्रमासाधनत्वेनाज्ञाते तत्र ज्ञानतैव न निर्वहेदित्यर्थः। स्वरूपेणेति। न्यायपरिकरत्वेनेत्यर्थः। अत एवाग्रे परिकरत्वे चाऽज्ञात इति वक्ष्यति। अन्यथेति। ज्ञानस्योपायसाध्यत्वादित्यर्थः। एवं चैतत्साध्यज्ञानस्योपायान्तरादेव सिद्धेरेते व्यर्थाः

(१) प्रमाणत इति वार्त्तिकं २५९।

शरीरादयो दश प्रमेयतया ज्ञेयाः, तथा हेयतयापि, अन्यथा अहेयाः स्युः हेयान्तरं चानुश्रियेत, प्रमेयत्वे चाज्ञाते हेयता न निर्वहेत् । यथा चापवर्गः प्रमेयतया ज्ञेयस्तथा ऽधिगन्तव्यतयापि, अन्यथा ऽधिगन्तव्यान्तरमनुश्रियेत, अनुपादेयश्च स्यात्, प्रमेयतया चाज्ञाते हानता न निर्वहेत् । यथा चा ऽऽत्मा प्रमेयतया ऽधिगन्तव्यस्तथा प्रमातृतयाऽपि, अन्यथा प्रमात्रन्तरमनुश्रियेत, अनवस्था च स्यात्,प्रमेयत्वे चाज्ञाते सोपाधिनिरुपाधितया हेयोपादेयते न निर्वहेयातां, यथा बुद्धिर्बुद्धित्वेन तथा तद्भेदः प्रमितितयाऽपि, अन्यथा प्रमित्यन्तरमनुश्रियेत निष्फलं वा प्रमाणं स्यात् । प्रमेयत्वे चाज्ञाते हेयता न निर्वहेदिति । तस्मात् त एव प्रमाणादय उभयथा ज्ञायन्तामिति विवक्षित्वोभयथा चतुर्वर्गोपादानं कृतमित्यर्थः ।

यदप्युक्तं कैश्चिद्धेयहानोपायाधिगन्तव्येष्विव चतुर्षु पुरुषार्थः समाप्यते, यथा लोके हेयः कण्टको, हान-

---

स्युरित्यत आह । निरर्थकाश्चेति । प्रमेयत्वे चेति । संसारकारणमिथ्याज्ञानविषयत्व इत्यर्थः । यथा चात्मेतिस्वात्मा । अन्यथेति । स्वप्रमां प्रति समवायित्वेनाज्ञाते स्वप्रमां प्रति प्रमात्रन्तरमनुसरणीयं प्रमातारं विना प्रमाऽनुत्पत्तेः । तथा च यथा स्वप्रमां प्रति प्रमात्रन्तरं तथा तत्प्रमायामपीत्येवं तत्र तत्रत्यनवस्थेत्यर्थः ॥

मुपानत्, तदुपायस्तु पादकृदादिः, अधिगन्तव्यो दुःखा-भावः, शास्त्रे च हेयो रोगः, चिकित्सा हानं, तदुपायो निदानज्ञानम्, अधिगन्तव्यमारोग्यमित्यतश्चतुर्षु वक्तव्येषु षोडशपदार्थोपवर्णनं क्वोपयुज्यत इति, तदपि निरस्तम्। चतुर्वर्गस्यैव विवक्षाभेदात् षोडशभेदेनाभिधानात्। विवक्षाभेदस्योपपत्तिं प्रतिपदं भाष्यकार एव दर्शयिष्यति। एतदधिगम्यैव येनाधिकं चोदितं तन्मतमपाकरोति। एतेनेति। [११।१६]

(इति आदिवाक्यस्यैव चतुर्थं तात्पर्यव्याख्या-व्याख्यानम्।)

"व्याख्यायते ऽवयवश" इति विशेषणे तात्पर्य-क्रियायाः (१) न तु विशेष्ये इत्यर्थः।

पादकृत्-चर्मकारः। चिकित्सा भेषजप्रयोगः। निदानं-रोग-मूलकारणम् ॥

(इति आदिवाक्यस्यैव चतुर्थं तात्पर्य्यव्याख्याव्याख्या-व्याख्यानम्।)

ननु पूर्वमपीदमेव वाक्यं व्याख्यातमित्यत आह। विशेषणे

---

(१) व्याक्रियाया इति पाठोऽशुद्धः।

एतदेवोत्तरत्र स्फुटयति। तत्रावयवेष्विति।(१)[१।१।२६]

कस्मात् प्रमाणादिति—नाभिहितमेवं ह्यसंन्दिग्धैव पञ्चमी स्यादित्यर्थः।

अस्येति (२) प्रकृतपञ्चमीपरामर्षे लिङ्गासङ्गति-रित्यत आह। अस्येति। [११।२८]

पञ्चम्यां तसिः प्रयोगं दर्शयित्वा पञ्चमीव्यतिरेकेण

इति। पदसमुदायात्मकवाक्यस्य विशेषण-मेकदेशः पदं तथा च पूर्वं वाक्यार्थो व्याख्यात, इदानीं पदार्थो व्याख्यायत इत्यर्थः॥

"प्राथम्यादिति" टीकायाः प्रमाणत इति प्रथमं पदमेकदेशत-सिप्रत्ययार्थद्वारा व्याख्यायत इत्यर्थः। "निमित्तपञ्चमी चेदिति" टीकायां पञ्चम्यर्थे तसेर्विधानात् तसिरेव पञ्चम्युपचरितः।

ननु प्रमाणात् प्रमाणत इत्यनयोर्न विशेषः कश्चिदित्यत आह। एवं हीति। तसेर्विभक्त्यन्तरेऽपि प्रयोगात् पञ्चम्यां सन्देहः स्यादित्यसन्देहार्थं प्रमाणादित्येव कर्तुमुचितमित्यर्थः॥

नन्वस्येत्यनेन प्रमाणत इत्येवंरूपस्य परामर्शो न युक्तस्तसि-प्रयोगमात्रस्य परिणामेऽपि तन्मात्रस्य परामृष्टव्यत्वादित्यत आह। अस्येति प्रकृतेति। यद्यपि तसेः परामर्षे लिङ्गासङ्गतिः, न चेकारलोपकत्वादिविधाने तसेरश्रवणादवशिष्टस्य प्रमाणत इत्यस्य परामर्षः कृत इति वाच्यम्। "तसिर्वचनविभक्तिव्याख्यार्थ" इत्यत्र

---

(१) तत्राऽस्यावयवेष्विति—१ पा० पु०।

(२) अस्यैवेति—२ पा० पु०।

तत्सिराक्षेपसमाधाने असङ्गते इत्याक्षेपं व्याख्यायाव-
तारयति । वचनव्याप्त्यर्थमिति । [१२।१]

ननु प्रमाणाभ्यां प्रमाणैरिति भवतु संप्लवः, प्रमाणे-
नेति तु कथमित्यत आह । यत्र द्वयोरिति ।[१२।५] वि-
षयैकतामात्रं संप्लवो न तु कारणानां समुच्चयः, तथा
सति फलभेदो न स्यात् । नापि समुच्चितानां करणत्वं
तथा सति व्यापारभेदो न स्यादिति ज्ञापनार्थमित्यर्थः ।

वार्त्तिके तसेः श्रवणात्, तथापि तसेः केवलस्याप्रत्ययकत्वात्
प्रकृत्यन्तर्भाविनैव परामर्शः कृत इति भावः ॥

ननु संप्लवे प्रमाणस्य प्रत्येकं प्रमाहेतुत्वकीर्त्तनं किमर्थ-
मित्यत आह । नन्विति । न ह्येकप्रमाणप्रवृत्तिस्थले संप्लवार्थ
इत्यर्थः । यद्यपि जात्यभिप्रायेणैकवचनप्रयोगात् सजातीय-
प्रमाणसंप्लवार्थं प्रमाणेनेति स्यात्, विजातीयसंप्लवस्य द्विवचनबहु-
वचनाभ्यां स्यात्, व्यवस्थायां चैवकारो विजातीयप्रमाणसंप्लव-
निषेधार्थः स्यात्, तथापि प्रमाणाभ्यां प्रमाणैरित्यत्र प्रमाण-
सामान्यपरत्वे बाधकाभावात् तत एवोभयलाभो युक्त इति भावः ।
नन्वेकैकस्य प्रमायामकरणत्वे संप्लवार्थ एव न स्यादिति तत एव
तल्लाभे पुनरपि वैयर्थ्यमेव इत्यत आह । विषयैकत्वेति । न
त्विति । अन्योन्यसहकृतानां फलजनकत्वमित्यर्थः । तथा सतीति ।
एककार्यजननं विना ऽन्योन्यसहकारित्वाभावात् प्रमारूपफलभेदो
न स्यादित्यर्थः । मिलितानां फलजनकत्वं न तु प्रत्येकमित्यत्र

अतएवेति। [१२।६] एवकारः साधकतमान्तरं व्यवच्छिन्दन् तस्य व्यापारं फलं च व्यवच्छिनत्ति, न त्वस्य स्वव्यापारफलयोरितरेतरनैरपेक्ष्यं दर्शयति तस्य संप्लवेऽपि सम्भवादित्यर्थः।

"कस्मात् पुनः करणार्थो गम्यते"—प्रकृतिप्रत्यययोः कतरस्मादित्यर्थः। अयमाशयः। यदि तृतीयया करणत्वमभिधीयते किं प्रकृतिस्थेन ल्युट्प्रत्ययेन, अथ तेनैव,

---

फलभेदो न स्यादिति दूषणं मत्वैव दूषणान्तरमाह। तथा सतीति। विजातीययोः प्रत्यक्षानुमानयोः सन्निकर्षपरामर्षव्यापारकत्वं न स्यादित्यर्थः॥

नन्वेवकारेण यद्येकप्रमाणस्य व्यापारफलयोरन्यप्रमाणापेक्षत्वं व्यवच्छिद्यते तदा संप्लवे ऽपि तत्सम्भवात् कथं संप्लवव्यवस्थयोर्भेद इत्यत आह। एवकार इति। संप्लवे एकप्रमाणविषयेण मानान्तरस्य व्यापारफलव्यवच्छेदः व्यवस्थायां च रूपादाविन्द्रियान्तरव्यवच्छेद इत्येवकारेण द्योत्यत इत्यर्थः।

ननु विभक्तिव्याख्यर्थात्तसेरेव प्रमाणैरिति लब्धे तत एव करणार्थो लभ्यत इति कस्मादित्ययुक्तमित्यत आह। प्रकृतीति। ननु तसिना करणत्वलाभस्योक्तत्वादेवात्रा ऽपि न जिज्ञासेत्यत आह। अयमाशय इति। तथा च तत्रैव विप्रतिपन्नस्यायं प्रश्न इत्यर्थः॥

ननु करणभावस्तृतीयया ऽवगम्येत, सैव नास्ति, सत्त्वे वा प-

किं तृतीययेति । ज्ञापकस्य कारकत्वशङ्का माभूदित्यत आह । अर्थ-मर्थाधिगतिमिति । [१२।११]

ननु प्रमाणेति(१) प्रातिपदिकादेव साक्षात्करणत्व-मर्थतो हेतुत्वं गम्यत इति किं विभक्तिव्याप्त्येत्यत आह । अत चेति । [१२।११]

न च वाच्यं करणभावेनापि प्रमाणफलयोस्ता-दात्म्यं प्रतिषेद्धुं शक्यं तत्किं तन्नान्तरीयकहेतुताभि-धानार्थं पञ्चम्येति । साधकत्वमात्रस्यैव सामर्थ्या

अस्या अभिधानमिति व्याहतमित्यत आह । नन्विति । विभक्ति-व्याप्तिफलस्य साक्षादर्थतश्च प्रातिपदिकादेव लाभादित्यर्थः ।

साधकत्वमात्रस्यैवेति । ननु किमसामर्थ्यं न तावद्व्याप्ति-विरह उपाधिव्यभिचारयोर्बाधात्, तत्त्वे वा साधकप्रामाण्ये ऽप्य प्रतीकारात्, विशेषव्यभिचारे सामान्याव्यभिचारस्यासम्भवात्, साध्याधिक्य. हेतुद्वयोपन्यासे च्छेकेनापरस्य कृतकतव्यत्वं दूषकता-बीजमस्तु विशिष्टस्यैव हेतुत्वात् साधकत्वे ऽपि पौर्वापर्यमात्र स्यैव तादात्म्यनिषेधानुमापकत्वे नियमांशस्य वैयर्थ्याच्च । मैवम् । विशिष्टस्य व्याप्यत्वे ऽपि वैशिष्ट्यं न व्याप्यतावच्छेदकं, येन विशेष-णेन विना व्याप्तिर्ग्रहीतुं न शक्यते तत्रैव वैशिष्ट्यस्य व्याप्यताव-च्छेदकत्वात् । अत एव गन्धादिषु मध्ये गन्धस्यैव व्यञ्जकत्वादि-त्यत्रासिद्धिवारकविशेषणान्तर्भावेनापि व्याप्तिस्तेन विना गन्धस्यैव

(१) प्रमाणमिति—२ पा० पु० ।

तमबर्थस्यासमर्थत्वात् तत्र विप्रतिपत्तेश्च। कस्मादिति प्रश्नार्थमभिप्रेत्याह। प्रमाणप्रातिपदिकेति। [१२।१३]

तदेवमनुवादकत्वं समर्थयता ल्युट्तृतीययोः पौनरुक्त्यं समाहितं, न चानुवादकत्वं शब्दाभ्यासस्य प्रयोजनवत्ताव्यतिरेकेण सिद्ध्यतीत्यतः प्रयोजनं दर्शयति। प्रमाकारकान्तरेभ्य इति। [१२।१४]

व्यञ्जकत्वादित्यस्याप्रसिद्धेर्व्याप्त्यग्रहात्। यत्र तु विशेषणेन विनापि व्याप्तिर्गृह्यते तत्र विशेषणवैयर्थ्यं यथा शरीराजन्यत्वादौ, इहापि तमबर्थानन्तर्भावेनापि व्याप्तिः सुग्रहेति स व्यर्थ एव, साधकत्वेन च पौर्वापर्यमेव हेतूक्तं न तु नियमांशोऽपि येन तत्रापि वैयर्थ्य-माशङ्कनीयम्। न च साधकतमत्वेऽपि करणत्वनान्तरीयकहेतुत्वेनैव साध्यसिद्धिः स्यादिति वाच्यम्। अविनाभावात्तदुपस्थितेर्विल-म्बितत्वेन पञ्चम्या श्रुतिव्याप्तस्यैव हेतुत्वस्यादरणौचित्यात्। यद्वा पूर्वोऽपरितोषेणाह। तत्रेति। कारणमात्रेणैव स्वोत्पत्त्यनन्तरमेव कार्यजननादतिरिक्तस्तमबर्थो नास्तीति बौद्धैरभ्युपगमात् तान् प्रति तमबर्थाभावेन हेतोरसिद्धिः स्यादित्यर्थः।

ननु प्रमाणेन इत्यत्र न पञ्चम्या करणत्वमनूद्यत इत्यत आह। कस्मादितीति। विभक्तिव्याख्या यदा तृतीयान्तात्तसिस्तदा तृती-*यया करणत्वलाभे किं प्रकृतिस्थेन ल्युट्प्रत्ययेनेति* यत्पौनरुक्त्यमा-पादितं तत्परिहरतीत्यर्थः। *प्रमाकारकान्तरेभ्य इतीति*। न च प्रमाणपदाधीनकरणत्वलाभादेवाभ्यर्हितत्वमपि लब्धमिति वाच्यम्।

लौकिके तु प्रयोगे सङ्ख्याभिधानादिभक्तेः सार्थकत्वमिति द्रष्टव्यम्। विशिष्टविषयत्वेन संप्लवाक्षेपो ऽसङ्गत एव अग्न्यादिविशिष्टे पर्वतादौ प्रत्यक्षानुमानयोः संप्लवादित्यत आह। विशिष्टो—भिन्न इति। [१२।१६]

प्रमाणस्य फलाङ्गेदे साध्ये केन रूपेण पक्षत्वमित्यपेक्षायां पक्षतावच्छेदकरूपस्य प्रमाणत्वस्य प्रमाणपदेनाभिधानात् इन्द्रियत्वादेः करणान्तराव्याप्यकत्वेन तदनवच्छेदकत्वात्। तथा चाभ्यर्हितत्वं करणत्वमेवोक्तं तृतीया च न करणत्वे, किं त्वित्थंभाव इति सम्प्रदायविदः॥

ननु यत्राभ्यर्हितत्वं न प्रमाणानां प्रतिपाद्यं तत्र ना ऽयं समाधिरित्यत आह। लौकिके त्विति। प्रातिपदिकात् करणत्वमात्रलाभे ऽपि तद्गतमेकत्वादिकं न प्रतीतं तदर्थं तृतीया प्रयुज्यते न तु करणत्वप्राप्त्यर्थमिति भावः। न च यत्र प्रमाणेनार्थं जानातीत्यत्र सङ्ख्यापि न विवक्षिता, यत्र वा प्रमाणतो ऽर्थं जानातीत्यत्र तसिरेव, तत्र का गतिरिति वाच्यम्। घटः कर्म करोतीत्यादावन्वयबोधाभावाद्विभक्त्युपस्थापित एवान्वयप्रकारे ऽन्वयबोध इति व्युत्पत्तेः प्रकृतिलब्धकरणत्वस्य तृतीयया ऽनुवादात्। वस्तुतस्तु पाचकादौ कृतां योग्यतावाचकत्वेन निर्णयात् स्फुटो योग्यतामात्राभिधाने ऽपि तृतीयया करणत्वप्रत्ययाददोष इति भावः। विशिष्टपदस्य विशेषणवन्मात्रवाचकस्य भिन्नार्थत्वव्याख्यानबीजमनुपपत्तिमाह। विशिष्टेति। विशिष्टविषयत्वं यदि व्यावृत्तिविषयत्वं तदा स्वलक्षणमात्रविषयकप्रत्यक्षे ऽलोकव्यावृत्तिविषयत्वं हेतुभागासिद्धः,

विषयत्वसामान्याभिप्रायमेकवचनम्। अर्थसामर्थ्यसमुत्थं प्रत्यक्षं यत: अतो ऽर्थगोचरम्। तत्किं हेतुत्वमेव विषयलक्षणं? नेत्याह। स एव चार्थ इति। [१२।१७]

अथाग्न्यादिविशिष्टपर्वतादिस्वलक्षणविषयत्वं तदा ऽनुमाने हेतुरसिद्ध इति विशेषणवद्धर्मिविषयत्वं तद्वाच्यमिति विशिष्टे धर्मिणि संप्लवः स्यादित्यर्थ:। यद्यप्येतावता प्रत्यक्षयोरनुमानयोर्वा संप्लवे न बाधकमुक्तं तथा ऽपि विजातीयप्रमाणसंप्लवनिराकरणपरो ऽयं ग्रन्थ: ॥

ननु विषय इत्येकवचनमयुक्तं प्रमाणानां प्रत्येकं विषयभेदादित्यत आह। विषयत्वेति। नन्वर्थगोचरत्वेनैवार्थसामर्थ्यसमुत्थत्वे लब्धे तदभिधानं व्यर्थमित्यत आह। अर्थसामर्थ्येति। तथा चार्थगोचरत्वे विप्रतिपन्नं प्रति तद्धेतुतया तदपि भणितमित्यर्थ:। नन्वर्थसामर्थ्यसमुत्थत्वेनैवार्थान्वयव्यतिरेकानुविधायित्वे लब्धे पुनस्तदभिधानं पुनरुक्तमित्यत आह। तत्किमिति। तज्ज्ञानहेतोरपि तद्विषयत्वे ज्ञानस्येन्द्रियादिरपि विषय: स्यादतीतानागतयोश्चासत्त्वेनाकारणतया तद्विषयत्वमनुमितेर्न स्यादित्यर्थ:। "ज्ञानप्रतिभास"मिति टीकायां ज्ञानाकारमित्यर्थ:। तथा च यो ऽर्थ: स्वाकाराधायको यत्र ज्ञाने तदाकारज्ञानस्य स विषय: एतच्च प्रत्यक्षज्ञानविषयत्वे व्यवस्थापकमुक्तमनुमित्यादावलीकस्याकारानाधायकस्यापि विषयत्वादिति भाव:। ननु "विशिष्टविषयत्वा"दिति प्रमाणविशेषको हेतुरुक्तो न त्वर्थधर्मिक इति प्रत्यक्षं न

किमतो यद्येवमित्यत आह । न च सामान्य-मिति । [१२।१८]

ननु च सांव्यवहारिकं स्वलक्षणमप्येवमेवेत्यत आह । स्वलक्षणमिति । [१२।१९] देशकालाननुगतं विचारसहमित्यर्थः ।

ननु यद्यपि न प्रत्यक्षं सामान्यरूपमवगाहते तथापि यद्यनुमानमपि स्वलक्षणमवगाहेत् तथापि संप्लवः स्यादित्यत आह । न चेति । १२।२२।

सामान्यविषयकमिति वक्तुमर्हतीत्यत आह । किमत इति । प्रत्यक्षस्य स्वलक्षणविषयत्वे सत्यपि सामान्यविषयत्वसम्भवात् संप्लवः स्यादेवेत्यर्थः । न च सामान्यमिति प्रत्यक्षधर्मिकमेव विशिष्टविषयत्वमभिप्रेत्य सामान्यस्य प्रत्यक्षाविषयत्वमुक्तमिति भावः ॥

ननु "स्वलक्षणं तु स्या"दिति पुनरुक्तं प्रत्यक्षं समर्थगोचरमित्यनेनैव तदभिधानादित्यत आह । नन्विति । सांव्यवहारिकं—व्यवहारमात्रविषयः । एवमेव—अवास्तमित्यर्थः । नन्वर्थक्रियासामर्थ्येनैव स्वलक्षणस्य वस्तुत्वव्यवस्थापनात् किमर्थं तस्य देशाद्यननुगम उच्यते अत आह । देशकालेति । तथा चार्थक्रियासामर्थ्यसिद्धार्थमेव तदभिधानमित्यर्थः ॥

अप्रसक्तनिषेधमाशङ्क्य प्रसक्तिमाह । ननु यद्यपीति ॥

नन्वर्थक्रियासामर्थ्यात् स्वाकारानाधायकत्वेन सामान्यस्य

ननु भवत्वनुमानं सामान्यमात्रनियतं, प्रत्यक्षमपि त्वत्र प्रवर्त्स्यति, भविष्यति च सामान्यमपि सत्त्वादाकाराधायकमतो ऽपि संप्लवसिद्धिरित्यत आह। न चेति। [१२।२४] भवितु मर्हति-परमार्थसदिति शेषः। विचारासहत्वादित्यर्थः।

तत्किं ? सामान्यस्यासत्त्वात् स्वलक्षणे च प्रतिबन्धग्रहासम्भवादनुमानं निर्विषयमेवेत्यत आह। तदिदमिति। [१२।२५]

प्रत्यक्षाविषयत्वादेव संप्लवे निरस्ते सामान्यस्य किमर्थमनेकदेशादिसंसर्गो निषिद्ध्यत इत्यत आह। ननु भवत्विति। तथा चार्थक्रियासामर्थ्यमसिद्धं मत्वा तत्सिद्ध्यर्थं तन्निषेध इत्यर्थः॥

परैर्व्यावृत्तिरूपस्यापि सामान्यस्यानेककालादिसंसर्गस्वीकारादाह। परमार्थेति। विचारेति। कार्त्स्न्यैकदेशादिवृत्तिनिरासादित्यर्थः॥

संप्लवस्यैतावतैव निरासात् तदुत्तरग्रन्थोपयोगार्थमाह। तत्किमितीति। तदिदमित्यादिटीका-तत्तस्मादिदं-सामान्यमनादिवासनोद्भूतविकल्पस्याधिष्ठानं-विषयो-ऽलीकमिति यावत्। विकल्पाकारस्या ऽलीकस्य बाह्यत्त्वं चाऽनुमानगोचरो ऽभ्युपेयमित्यर्थः। विकल्पाकारस्येति प्रसङ्गागतं मतान्तरं, अलीकत्वमात्रस्यैव प्रकृतत्वात्। अत एवाग्रे तदेव विकल्पाकारतया साधयति।

तत्किमनुमानमप्रमाणमेवापरमार्थगोचरत्वात्, यद्येवं कथं तदन्यदुल्लिख्यान्यत्र प्रवर्त्तयति, कथं च तद-विसंवादकम्, कथं च बाधिताकारं प्रमाणतया व्यव-ह्रियत, इत्यत आह । तस्मादिति । [१३।६]

ननु प्रमाणान्तरेण सह संप्लवो भविष्यत्यनयोरि-त्यत आह । न चेति । [१३।१०] नन्वस्ति शब्दादिक-मित्यत आह । प्रमाणस्येति । [१३।१०]

ननु नान्तर्भवत्येवाऽस्वलक्षणविषयत्वाद्विषयाप्रति-बद्धत्वाच्चेत्यत आह । अनन्तर्भावि चेति । [१३।१०]

तच्चेति । तत्सामान्यमित्यर्थः । आद्यं हेतुं विवृणोति । यत्खल्विति । अन्यव्यावृत्तिरेव निष्ठा स्वरूपं यस्य तत् तथा । द्वितीयहेतुविवरणं न चालोकस्येति । अत्यन्तविलक्षणानां यत्सादृश्यं तदन्यव्यावृत्ति-रूपं यथा विज्ञानालोकयोः सादृश्यममूर्त्तत्वम् । तृतीयहेतुविव-रणं न च गौरिति । गौरिति विकल्पो यद्यश्वादिव्यावृत्तिविषयो न स्यात्तदाऽऽवृत्तिविषयः स्यादित्यवश्यं तस्य व्यावृत्तिविषयत्वे तत एवानुगतमतिरित्यर्थः । प्रमातृाशयः-पुरुषाभिमानस्तद्वत्तत्प्रमाण-मिति व्यवह्रियत इत्यर्थः ।

निबन्धे ऽन्यदिति । अन्यत्-अलोकमन्यत्र-स्वलक्षणे । अवगति प्रवृत्त्योः समानविषयत्वादित्यर्थः ।

प्रमाणान्तरसत्त्वे ऽपि प्रकृते यत् सिद्ध्यति तदाह नन्विति ।

ननु स्वलक्षणसामान्ययोर्व्यवस्थायामपि प्रत्यक्षानुमानयोर्विषयान्तरे संप्लवो भविष्यति, अस्ति हि विषयान्तरं तद्वदित्यत आह। न चेति। [१३।११]

न ह्यसता सामान्येन परमार्थसत्(१) स्वलक्षणं तद्वद्भवितुमर्हति सदसतोः सम्बन्धाभावादित्यर्थः। सो ऽयं गहनः पन्था इत्याशयवानाह। यथा चैतदिति। [१३।१२]

विशेष इत्यत्र यदि कर्मकारकं न ततस्तद्वन्नामापरो ऽस्तीत्यत आह। विशेष इति। [१३।१३] संप्लवमस्म-

च्छब्दादेः प्रत्यक्षानन्तर्भावे हेतुमाह। अस्वलक्षणेति। अनुमानानन्तर्भावे हेतुमाह। विषयेति।

अप्रमक्तप्रतिषेधमाशङ्क्याह। ननु स्वलक्षणेति। व्यवस्थायां नियतमानवेद्यतायामित्यर्थः। तद्वदिति। विशिष्टमित्यर्थः।

यथाश्रुतस्यागमकत्वादाह। न हीति। नन्वाक्षेपवत् समाधानमपि विस्तरेणैव किं नोक्तमित्यत आह। सो ऽयमिति। तथाच गहनतयाऽऽक्षेपस्य तन्निराकरणे ऽत्यतीव ग्रन्थगौरवमापद्येतेत्यर्थः॥

विशेषशब्दे कर्मव्युत्पत्त्यनादरे हेतुमाह। विशेष इति। कर्मव्युत्पत्तौ विशेषपदेनैव तद्वतो विशिष्टस्याप्यभिधानात् तद्वदिति व्यर्थं स्यात् विशिष्टस्यान्यस्याभावादित्यर्थः। अन्यथेति टीकायामत्यः-पदार्थविशेषः। ननु संप्लवस्य व्यवस्थापितत्वात्तमसृष्यमाण

(१) परमार्थसन् इति २ पा० पु०।

ष्यमाणा इदमाह। मीमांसक इति शेषः। "अधिगतं चार्थं"मित्यादिवार्त्तिकस्याधि"गतत्वा"दित्यादिवार्त्तिकादधिकार्थतां विवक्षन्नाह। स्यादेतदित्यादि। [११।१५]

अधिगते ऽर्थे प्रमाणान्तरस्य न तावदर्थाधिगमं प्रत्युपयोगस्तस्य प्रागेव प्रमाणसिद्धत्वात्। नाप्युत्तरोत्तरप्रवाहव्यवहारनिर्वाहं प्रति, तस्यापि तज्जन्यसंस्कारप्रभवस्मृतिसन्ततिसिद्धत्वात्। न च वाच्यं स्मृतिसन्ततिरधिगतिसन्ततिर्वा ऽस्तु व्यवहारप्रवर्त्तिनी न कश्चिद्विशेष इति। स्मृतिवदुपदर्शितार्थमात्रविषयतया तासामप्रमात्वेन तत्साधनस्याप्रमाणत्वप्रसङ्गात्, तासां च

इत्ययुक्तमित्यत आह। मीमांसक इति। पूर्वोक्तसमाधिना बौद्धः परं निराकृतः सामान्यादिसत्त्ववादी भट्टः संप्लवमिदानीमाक्षिपतीत्यर्थः। नन्वाक्षेपविवरणत्वमसम्भवे किमन्यथा व्याख्यानेनेत्यत आह। अधिगतं चार्थमिति। अधिगतार्थताविवक्षाविवरणपरत्वे समुच्चयार्थचकारानुपपत्तिर्बीजमिति भावः॥

ननु स्मृतिसन्ततिसम्भवे ऽप्यधिगत्यन्तरत्वेनोत्तरस्यानुभवान्तरस्योत्पादनेनार्थवत्त्वं तदवस्थमेवेति कुतः पिष्टपेषणमित्यत आह। अधिगते ऽर्थे इति। अधिगत्यन्तरं हि स्वत एवोत्पद्यते उत्तरव्यवहारहेतुत्वेन वा, आद्य आह। तस्येति। अन्त्य आह। नाप्येति। तासामिति। गृहीतमात्रविषयतया स्मृतिवत्तासामप्रमात्वेन

तत एव स्मृतित्वप्रसङ्गात्, स्मृतिसन्ततेश्चावश्यम्भावितया तत एव व्यवहारसिद्धावधिगतिसन्ततिकल्पनायां कल्पनागौरवप्रसङ्गादित्याशयवान् पिष्टपेषणमेवोपसंहरति। अधिगतमिति। [१३।१८]

"अन्यथेति" वार्त्तिके यदि कारणगतमन्यप्रकारत्वं विवक्षितं तदा कारणगतप्रकारभेदेऽपि न कश्चिद्विषयगतो(१)विशेषः पिष्टपेषणपरीहारोपयोगी दर्शितः स्यात्। अथ विषयगत एव प्रकारभेदो दर्शितः तदाऽनधिगतार्थगन्तृतया कुतः संप्लवः, न च विषयाभेदेऽपि प्रमाणभेदात् कश्चित्फलप्रकारभेदः प्रकृतोपयोगवानस्तीत्यत आह। अयमभिसन्धिरिति। [१३।२१] पिष्टपेषणं निष्फलत्वं वा स्यात्, अविशिष्टफलत्वं वा, अनपेक्षितफलत्वं वा, अधिगतेऽप्यर्थे किमित्यधिगतिसाधनमधि-

---

तत्कारणस्याप्रमाणत्वमेव विशेष इत्यर्थः। तत एवेति। गृहीतमात्रगोचरत्वादेवेत्यर्थः। स्मृतिसन्ततेश्चेति। पूर्वाधिगतिजन्यसंस्कारस्य हेतोः सम्भवादित्यर्थः। भट्टमते ज्ञानमतीन्द्रियत्वात् कल्प्यमित्याशयेनाह। कल्पनेति।

कुतः संप्लव इति। यद्यपि प्रकारभेदेनानधिगतार्थतया

---

(१) विषयकृतो इति २ पा० पु०।

गतिं करोतीति प्रश्नमात्रं वा, साधनासम्भव एव वेति। तत्र साधनासम्भवं दूषयति। न हीति। [१३।२७]

स्वकारणप्रतिबन्धे हि प्रमाणं न स्यात्। न च विषयाधिगमः प्रमाकारणविरोधी येन तस्मिन् सत्येव प्रमाकारणमकारणं भवेत्। तस्मादालोच्य स्वयमेव निवर्त्तेरन्, यदि चेतयेरन्, न चैतदस्तीत्यर्थः।

प्रश्नमात्रं दूषयति। नापीति। [१३।२३] अनपेक्षितफलत्वमुत्थाप्य दूषयति। प्रमातुरिति। [१३।२५] निष्फलत्वं निराकरोति। तस्मादिति। [१३।२७]

प्रत्युत्पन्नकारणसामग्रीजनितत्वं(१)-तात्कालिका-

धर्मिणि संप्लवः सम्भवत्येव तथाऽप्यन्यूनानतिरिक्तविषयतया न संप्लव उपपादित इति भावः॥

तात्कालिकेति। संस्कारासमवहितसामग्रीजनितत्वमित्यर्थः। तेन संस्कारात्प्रत्यव्यवहितोत्तरक्षणजातस्मृतौ नातिव्याप्तिर्न वा धारावाहिके चिरस्थिरेन्द्रियसन्निकर्षे ऽपि व्यासङ्गोत्तरजातप्रत्यक्षे चाव्याप्तिः। न च प्रत्यभिज्ञानाव्याप्तिस्तस्यापि संस्कारजन्यत्वादिति वाच्यम्। अत एव विशिष्टज्ञानस्याव्यवहितविशेषणज्ञानजन्यत्वाच्च तस्य संस्काराजन्यतया तज्जन्यतत्तास्मृतिजन्यत्वात्। अत एव टीकाकारो द्वितीयाध्याये वक्ष्यति "प्रागनुभवः पुनरनुभवोऽस्य-

(१) मुद्रिततात्पर्यटीकायां १४ पृ०-३ पङ्क्तौ परिशुद्ध्यनुसारेण तत्कालप्रत्युत्पन्नकारणजनिता बुद्धिरिति पाठो युक्तः।

साधारणकारणविशिष्टसामग्रीजनितत्वम्। एतेनानुभवत्वं दर्शितं, स्मृतेर्ह्यसाधारणं कारणं संस्कारः, आत्मान्तःकरणादीनां ज्ञानान्तरसाधारण्यात्, स च चिरकालोत्पन्नो न प्रत्युत्पन्नः। यत्तु प्रत्युत्पन्नमुद्बोधापरनाम, सहकारि न तदसाधारणं, अनुभवस्य तु चतुष्टयसन्निकर्षाद्यसाधारणं, तच्च प्रत्युत्पन्नं-प्रत्यग्रमुत्पन्नं, तथाभूता बुद्धिरबाधितेति शेषः।

अविशिष्टफलत्वमभ्युपेत्य पराभिप्रायं निराकरोति। तज्जनकानीति। [१४।१] प्रथमप्रमाणफलतोऽप्यविशिष्ट-

स्मृतिरथ प्रत्यभिज्ञानमिति"। यद्वाऽनयैवानुपपत्त्या पूर्वापरितोषेणाह। एतेनेति। यद्वा व्यक्तिष्वसाधारणजन्यत्वं ग्रहीतुमशक्यमित्यनुगमकं कार्यगतं सामान्यमाह। एतेनेति। अनुभवत्वजातिः व्यञ्जकमेवानेनोक्तम्। स्मृतेर्हीति। न च स्मृतेर्न संस्कारोऽसाधारणं कारणं प्रत्यभिज्ञानेऽपि तस्य जनकत्वादिति वाच्यम्। संस्कारस्य प्रत्यभिज्ञानाजनकत्वादित्युक्तत्वात्। इतरजनकत्वेऽप्यसाधारणकारणत्वस्यानपायाच्च कर्मणो विभागजनकत्वेऽपि संयोगासाधारणकारणत्वादिति भावः। यत्त्विति। तस्य सदृशदर्शनादिरूपस्यानियतत्वेनासाधारणत्वाभावादित्यर्थः। चतुष्टयेति। इन्द्रियार्थतदुभयावयवा इत्यर्थः। आदिशब्दादनुमित्यादौ लिङ्गपरामर्शादेः परिग्रहः। एतावन्मात्रं भ्रमसाधारणमित्यतो विशेषयति। अबाधितेति॥

फलतया यद्यानर्थक्यं द्वितीयवत् प्रथमप्रमाणस्यापि द्वितीयाविशिष्टफलतया ऽऽनर्थक्यं स्यात्। अनपेक्षत्वात् सार्थकत्वमिति चेत् एवं तर्हि द्वितीयस्यापि स्वफले ऽनपेक्षत्वमेव। तत् फलं प्रमारूपमेव न भवति गृहीतमात्रगोचरत्वात् स्मृतिवदित्यपि न युक्तम्। यथार्थानुभवत्वनिषेधे साध्ये कालातीतत्वात्। अधिगतार्थत्वे (१) सिद्धसाधनात् साध्यसमत्वाच्च। व्यवहारनिषेधे च तन्निमित्तविरहोपाधिकत्वात्। बाधितत्वाच्च। प्रमाव्यवहारनिमित्तं च वक्ष्याम इत्यर्थः।

यथाश्रुतस्य पराभिप्रायानिवर्त्तकत्वादाह। प्रथमेति। स्वफल इति। परामर्शादिः स्वोत्पत्तौ प्रत्यक्षापेक्षत्वे ऽपि फले ऽनुमितावन्यानपेक्षत्वमेवेत्यर्थः। साध्यसमत्वाच्चेति। अधिगतार्थत्वगृहीतमात्रगोचरत्वयोः साध्यहेत्वोरविशेषादित्यर्थः। तन्निमित्तेति। प्रमाव्यवहारे यथार्थानुभवत्वस्यैव निमित्तत्वात्तस्य चात्र सत्त्वरूपेत्यर्थः। बाधितत्वाच्चेति। उक्तस्यैव निमित्तत्वात्तस्य चात्र सत्त्वात्तन्निषेधे साध्ये बाधादित्यर्थः। नन्वधिगतार्थगन्तृत्वं प्रमापदप्रवृत्तिनिमित्तमित्युपाधिः साधनव्यापको न बाध इत्यत आह। प्रमाव्यवहारेति। तत्राव्याप्त्यादिदोषस्य वक्ष्यमाणत्वान्न तत्प्रवृत्तिनिमित्तमित्यर्थः॥

---

(१) अनधिगतार्थत्वे साध्ये इति २--पा० पु०।

एवं तर्हि वार्त्तिकार्थः क ? इत्यत आह । स एव चेति । [१४।४]

ननु फलस्याऽपि साक्षात्कारासाक्षात्काररूपः प्रकारभेदो ऽस्त्येव स एवानेन किं ? न प्रदर्श्यत इत्यत आह । यद्यपीति । [१४।५] आदिग्रहणेन कारणगतो ऽपीन्द्रियलिङ्गादिरूपः प्रकारभेदः सङ्गृहीतः । कारणभेदसंप्लवनिरासार्थमेव हि परः प्रत्यवस्थितः स कथं तेनैव प्रतिबोधनीयः । तथा साक्षात्कारासाक्षात्कारभेदेनापि धारावाहिषु कथं परः प्रत्याय्यः । परप्रतिबोधश्च प्रकृतः तदिदमुक्तं प्रकृतानुपयोगादिति ।

(इति विभक्त्यर्थव्याख्यानपरतात्पर्यव्याख्यानम् ।)

एतावतैवाक्षेपस्य निराकृतत्वादग्रिमग्रन्थोपयोगार्थमाह । एवं तर्हीति ॥

ननु प्रकारान्तरसत्त्वे ऽपि प्रकृते किमुक्तं स्यादित्यत आह । नन्विति । प्रकृतानुपयोगमाह । कारणभेद इति । ज्ञानानां कारणभेदे सत्यपि न संप्लव इति वदन् कथं कारणभेदेन निराकृतः स्यादित्यर्थः ॥

धारावाहिष्विति । तत्रैकजातीयेष्वेव संप्लवस्वीकारान्न फलजातिभेदः स्यादित्यर्थः । पर इति । अनधिगतार्थत्वप्रयोजकविषयभेदप्रदर्शनेनैव स निवर्त्तहतीति भावः ॥

(इति विभक्त्यर्थव्याख्यानपरतात्पर्यव्याख्याव्याख्यानम् ।)

एवं सिद्धं प्रमाणं हृदि कृत्वा संप्लवव्यवस्थे विचारिते, संप्रति प्रमाणस्वरूपं निरूप्यत इत्याह । विभक्त्यर्थेति । [१४।१०] अवधार्यत इति । [१४।११] तथा च विचारस्य परीक्षाया अवश्यं संशयपूर्वकत्वादग्रे सन्दिग्धस्य प्रश्नो युक्त इति भावः ।

सन्देहकारणत्वेन निमित्तमाह । केचिदिति । [१४।१२]

नन्विदानीं प्रातिपदिकार्थनिरूपणमित्ययुक्तं, पूर्वं प्रमाणपदार्थमादायैव संप्लवस्य व्यवस्थापनादित्यत आह । एवमिति । यद्विचारनिरूपितं प्रमाणमादाय संप्लव उक्तः स एवेदानीं प्रस्तूयत इत्यर्थः । तस्य तस्यापि तद्धितान्तत्वेन प्रातिपदिकत्वात् तन्निरूपणनिरासायाह । प्रमाणस्वरूपमिति । विभक्त्यर्थेनेति । ननु तसिर्न विभक्तिः । न च तसेश्चेत्यनेन तसिस्थाने प्राग्दिशीयतसिलो विहितस्य विभक्तिसंज्ञेति वाच्यम् । किंसर्वनामबहुभ्य एव तसेः तसिल्विधानात् । न, यस्या विभक्तेस्तसिस्तद्विभक्त्यर्थमित्यर्थात् । अवधारणशब्दे करणव्युत्पत्त्यादरबीजमाह । तथा चेति । अन्यथा ऽवधृतिक्रियां प्रतिज्ञायाऽग्रे प्रश्नक्रिया कथं सङ्गच्छेतेति भावः । यद्यपि यथा विचारः संशयपूर्वकस्तथा तत्साध्याऽवधृतिक्रियापि संशयपूर्विकेति करणव्युत्पत्तिरफला, तथापि करणव्युत्पत्तिं विनाऽवधृतिक्रियायां विचारसाध्यत्वमेव न ज्ञायत इति सैव दर्शिता । भावभवितारावितिं टीकायां भावो-धर्मः-प्रमाणत्वम् । भविता-धर्मी-प्रमाणलक्षणमित्यर्थः ॥

प्रमाणं हि कारणविशेषः कारणं च साधकतमम्। न च साध्यसिद्धौ तज्जातीयस्य साधकत्वमस्ति, छिन्ने परशोरिव, तस्माद्यथा ऽच्छिन्नविषयतया व्याप्रियमाणः परशुः छेदने भवति तथा ऽप्रमिते विषये व्याप्रियमाण-मिन्द्रियादिकं प्रमाणमिति मीमांसकाः।

मतान्तरमाह। विषयसारूप्यमिति। [१४।१२] फलं तावत्प्रमाणस्यार्थप्रतीतिरेव प्रमारूपत्वात्। न हि प्रमाणस्यार्थे प्रमातिरिक्तमपि किञ्चित् कर्त्तव्यमस्ति। प्राप्तिरपि प्रवृत्तिरेव। प्रवृत्तिरपि प्रवृत्तियोग्यार्थोप-लम्भनमेव। तस्मात् प्रमाणस्यार्थप्रतीत्यतिरिक्तं न किञ्चित् फलमिति। यदाह—

"तदेव प्रत्यक्षज्ञानं प्रमाणफलमर्थप्रतीतिरूपत्वा"दिति।

पराभिमते उपपत्तिमाह। प्रमाणं हीति। तज्जातीयस्येति। करणजातीयस्येन्द्रियादेरित्यर्थः। तस्मादिति। तद्विषयसाध्यस्वसा-ध्यजातीयक्रियान्तराभावे तदनुकूलव्यापारवत्कारणं तथा च प्रमाण-मप्यप्रमित एव विषये व्याप्रियमाणं प्रमाणमिति भाट्टा इत्यर्थः॥

प्रमाणस्यार्थेन प्रामत्वनियमादर्थस्य प्राप्तिमाह। प्राप्तिरपीति। नन्वेवमुपेक्षणीयविषयकं प्रमाणं न स्यात्तस्याप्राप्तिफलत्वादित्यत आह। प्रवृत्तिरपीति। न किञ्चिदितीति। प्रमाणव्यवहाराङ्ग-

प्रमाणमपि तदेव यदर्थं व्यवस्थापयति । अर्थमपि तदेव व्यवस्थापयति, यदर्थप्रतीतिं तदीयतया नियमयति । तथात्वेनानियतायां तु तस्यां न कस्यचित् सर्वस्यैव वेति नार्थेन नियता प्रतीतिः स्यात् । अनियतार्थप्रतीतिजनकं च कथं प्रमाणं नाम । न चेन्द्रियादिभिर्ज्ञानं करणैर्ज्ञानं तदीयतया नियम्यते । न हि चक्षुषा जनितत्वादेव नीलस्य नीलज्ञानं, पीतज्ञानस्याऽपि तथात्वप्रसङ्गात् अपि तु नीलाकारत्वादेव नीलज्ञानं नीलस्य । तस्मादर्थाकार एव बुद्धिगतो बुद्धिं तदीयतया व्यवस्थापयन्नर्थमपि तथा व्यवस्थापयति ततश्चार्थव्यवस्थापनहेतुत्वात् स एव प्रमाणम् । यदाह—

"अर्थसारूप्यमस्य प्रमाणं तद्वशेनार्थप्रतीतिसिद्धे"-रिति ।

अर्थप्रतीतिसिद्धेः-अर्थप्रतीतिव्यवस्थितेः-तथा चार्थ-

मित्यर्थः । तदीयतयेति । नियतविषयसम्बन्धितयेत्यर्थः । ततश्चेति । विषयव्यवस्थापकस्य प्रमाणत्वात्तादृशस्य चान्यस्याभावात् परिशेषेणाकार एव तादृश इति स एव प्रमाणमित्यर्थः । तथा चेति । अर्थप्रतीतिव्यवस्थितौ सत्यामित्यर्थः । प्रतीतिभेदनियम्य-

व्यवस्थितेरिति यावत्। न चाभिन्नात्मनि करणफल-भावो विरुद्ध्यते। स हि व्यापारव्यापारिभावो वा, गम्यगमकभावो वा। वृक्षादिभिः संयुज्यमान एव हि परशुः संयोगेन व्यापारेण करणमिति व्यवह्रियते लोके। न च संयोगो नाम विग्रहवानन्यः संयुज्यमानात् परशोरस्ति। गम्यगमकभावोऽपि स्वप्रकाशे विज्ञाने बाह्ये च वृक्षे शिंशपया गम्यमाने दृष्ट एव। न हि शिंशपातः कश्चिदन्यो वृक्षो नाम। वृक्षाद्वा शिंशपा। वैकल्पिके तु व्यवहारे यथाऽत्र व्यावृत्तिभेदस्तथा कारकतद्वतोरपीति कश्चिन्न विशेष इति सौत्रान्तिकाः।

त्वादर्थस्येति भावः। न चेति। तद्दर्शने आकाराकारिणोरभेदादित्यर्थः। विग्रहवान् प्रमाणसिद्ध इत्यर्थः। गम्यगमकभावयोर्यदि विषयविषयिभावस्तत्राह। स्वप्रकाश इति। अथ ज्ञाप्यज्ञापकभावः तत्राह। बाह्ये चेति। ननु शिंशपात्ववृक्षत्वयोर्गम्यगमकभावस्तयोश्च व्यावृत्तिरूपतया नाभेद इत्यत आह। वैकल्पिके त्विति। वैकल्पिके-सविकल्पकजन्ये। तथा चात्रापि तद्वदेव व्यावृत्तिभेदस्तुल्य इत्यर्थः। यद्यप्यनागतायाः शिंशपाया गमकत्वाभावात्तद्ज्ञानं गमकं तच्च ततो भिन्नमेवेति न तादात्म्यं तथापि परामृश्यमाणं लिङ्गं करणमिति मतमभिप्रेत्यैतदुक्तम्।

मतान्तरमाह। विज्ञानस्यैवेति। [१४।१३] अर्थप्रकाशनं हि यस्य व्यापारस्तदेव प्रमाणं, प्रकाशनं च चैतन्यरूपं तस्यैव, यश्चेतयते। न चेन्द्रियादीनि करणानि तथा, जडरूपत्वात्। न हि ज्ञानातिरिक्तः कश्चिच्चेतनो नाम ? तस्माद्विज्ञानमेव चेतनतया दर्शनव्यापारतया च प्रमाणम्। व्यापारव्यापारिणोश्चाभेद एव संयुज्यमानपरशुवदिति निराकारवादिनो वैभाषिकादयः।

मतान्तरमाह। उपलब्धीति। [१४।१४] वृद्धाः-प्रमाणवृद्धाः।

"भावप्रश्नव्याख्यानेन भवितृप्रश्नोव्याख्यात"—

तदेवेति। प्रमायाः स्वप्रकाशात्मकत्वादित्यर्थः। जडरूपत्वादिति। अज्ञानरूपत्वादित्यर्थः। न हीति। तस्य स्थिरत्वे अर्थक्रियाया अभावादित्यर्थः।

वृद्धत्वमात्रेण न पक्षस्य प्रामाणिकत्वज्ञापनमत आह। प्रमाणवृद्धा इति। न तु धनादिवृद्धा इत्यर्थः।

ननु भवितृप्रश्न एव टीकाकृता व्याख्यायते न तु भावप्रश्नस्तथाच विपरीतं वक्तुमर्हतीत्यत आह। सर्हेति। सर्हेत्यध्याहृत्येति व्याख्या न युक्ता भावप्रश्नस्याव्याख्यानात् सहार्थत्वानुपपत्तेः। न च भावभवितारौ पृच्छतीत्यनेनोभयप्रश्नो व्याख्यातः। तदा स्वशब्देनैव तस्य व्याख्यातत्वात् पुनस्तदभिधानवैयर्थ्यापत्तेः।

इति तु सहेत्यध्याहृत्य केचिद्व्याचक्षते। केचित्तु भावप्रश्नव्याख्या बोद्धव्या, अनेन भवितृप्रश्नो व्याख्यात इति। अन्ये तु भावप्रश्नव्याख्यानेन हेतुना भवितृप्रश्नो व्याख्यातो भावप्रश्नं व्याख्यातुं भवितृप्रश्नो व्याख्यातः तदन्तरेण तदनुपपत्तेरिति। लिपिप्रमादोऽयमिति सम्प्रदायविदः।

व्यभिचारो-विसंवादः। अनर्थवत्त्वं विपरीतार्थवत्त्वम्। अतो न साध्याविशिष्टता।

ननु स्थाणुर्वा पुरुषो वेत्युपदर्शितयोरन्यतरः प्राप्यत एव तत्कथं विसंवादकत्वं कथं चानर्थवत्त्वमित्यत आह। नो खल्विति। [१४।१०] यतो न प्राप्यते

द्वितीयतृतीयव्याख्या ऽप्ययुक्ता भवितृप्रश्नस्य स्वातन्त्र्येणैव कृतत्वात् तद्व्याख्यानस्य भावप्रश्नव्याख्यानपरत्वाभावादित्यत आह। लिपीति।

ननु अतद्वति तत्प्रकारकज्ञानत्वस्य व्यभिचारित्वात् साध्याविशिष्ट्यमित्यत आह। विसंवाद इति। विसंवादः फलानभिसम्बन्धोऽतद्वति तत्प्रकारकज्ञानत्वं च व्यभिचारित्वमित्यर्थभेद इत्यर्थः (१)।

अप्रमत्वप्रतिषेधमाशङ्क्याह। नन्विति। नोखल्वितीति। न

(१) व्यभिचारानर्थवत्त्वमित्यर्थभेद इति २ पा० पु०।

ऽत एव नार्थक्रियासूपयुज्यते, अप्राप्तेरनुपयोगाच्च नास्तीत्यर्थः ।

यद्यप्यनुभवाभिप्रायेणोपलब्धौ व्याख्यायमानायां स्मृतिहेतौ नास्ति प्रसङ्गः स्मृतेरननुभवत्वात्, तथापि "बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तर"मिति (१) सूत्रयतोपलब्धिशब्दो ज्ञानपर्यायः स्वीकृतः । अस्ति च स्मृतेरपि ज्ञानत्वमित्यनेनाभिप्रायेणोक्तम् । न ह्यसाविति । [१४।१८]

अतीतार्थे परम्परया तत्कार्यतयाऽपि शब्दलिङ्गादेरर्थसम्बन्धो ऽस्ति, अनागते तु सो ऽपि नास्तीत्यत आशङ्कितं ज्ञापकतयेति । संस्कारस्यापीति । [१४।२२]

चान्यतरस्यापि संशयविषयत्वेन विकल्प्यमानत्वात्तत्प्राप्तौ विकल्प्यमानप्राप्तिरस्त्येवेति वाच्यम् । तथापि विशिष्टस्याप्राप्तेर्यावदुपदर्शितार्थप्राप्त्यभावादन्यतरप्रमात्वे ऽपि विशिष्टे प्रमात्वाभावादित्यर्थः । अर्थक्रियानुपयोगित्व एव हेत्वाकाङ्क्षायां पूरयति । यतो नेति ।

तथापीति । यद्यपि सूत्रस्यार्थान्तरत्वमात्रनिराकरणपरतया सामान्यविशेषभावेनाप्युपपत्तेर्न ततः पर्यायत्वं लभ्यते तथापि व्याख्यातृभिः पर्यायत्वकथनपरत्वेनैव सूत्रस्य व्याख्यानपारम्पर्यात्तत एव चार्थान्तरनिराकरणस्यापि लाभ इति भावः ।

(१) गौ सू. अ. १ आ. १ सू. १५ ।

तस्यापि परम्परयाऽर्थकार्यत्वमर्थज्ञापकत्वं च साक्षात् समानमित्यर्थः।

ननु न स्मृतिः प्रमेत्यत्रैव विवाद इत्यत आह। लोकेति। [१४।२४]

अनेन प्रमाशब्दप्रवृत्तिनिमित्तग्राहकं प्रमाणमुपलक्षयति। तथाहि न तावद् ज्ञानत्वादिकं तन्निमित्तं, येन स्मृतिरपि प्रमा स्यात् विपर्ययस्यापि तथात्वप्रसङ्गात्। नापि प्रमात्वं नाम सामान्यविशेषः समस्ति,

परम्परयेति। शब्दलिङ्गादेः प्रत्यक्षपूर्वकत्वात्तस्य चार्थजन्यत्वात् परम्परयाऽर्थसम्बन्ध इत्यर्थः। प्रमाणशब्देनेति टीका—यद्यपि प्रमाणपदं लक्ष्यपदं न च ततो लक्षणे विशेषलाभस्तथाप्युपलब्धिपदमेव प्रमाणपदसमभिव्याहारात् तदन्वययोग्यानुभवे वर्त्तत इत्येतावतैव प्रमाणपदेनेवेत्युक्तम्।

ननु स्मृतिर्न प्रमा ततस्तत्साधनमपि न प्रमाणमित्येतावतैव प्रकृतसिद्धेः किं लोकानुसरणेनेत्यत आह। ननु नेति।

ननु यथार्थं ज्ञानमेव प्रमा लाघवात् न तु तद्विशेषो गौरवादित्यत आह। अनेनेति। ज्ञानत्वादिकमित्यादिपदेन सविषयकत्वादिग्रहणम्। नन्वनुगतप्रमाव्यवहारात् प्रमात्वं जातिरस्त्विति सैव प्रमापदप्रवृत्तिनिमित्तं स्यादित्यत आह। नापीति। सामान्यं-जातिः। तद्विशेषः-स्मृतिसाधारणः। समस्ति-सम्भवति।

ज्ञानगतस्य सामान्यविशेषस्य मनोमात्रग्राह्यत्वात् । प्रमात्वस्य चानुमेयतया प्रागेव प्रतिपादितत्वात् । प्रमात्वं च सामान्यविशेषस्तदभाववति तद्विरुद्धसामान्यवति वा विपर्ययज्ञाने न समवेयात् तथा च विपर्ययज्ञानं धर्मिण्यपि न प्रमा स्यात् । एवं च निरालम्बनमापद्येत । सामान्यं च सामान्यान्तरेण सह परापरभावेन एकस्यां व्यक्तौ समाविशेत् । तत्रानुभवत्वं वा परं प्रमात्वं वा । आद्ये स्मृतिः कथं प्रमा । द्वितीये त्वनुभवः प्रमात्वं न व्यभिचरेत् । तथा च

येन तदेव प्रमापदप्रवृत्तिनिमित्तं स्यादित्यर्थः । जातिर्व्यक्तियोग्यतयैव योग्यत्वाज्ज्ञानग्रहे प्रमात्वस्यापि ग्रहापत्तेः । प्रमात्वस्य नित्यानुमेयत्वसिद्धान्तविरोध इत्याह । ज्ञानेति । अप्रमात्वं यदि प्रमात्वात्यन्ताभावज्ज्ञानत्वं तत्राह । तदभाववतीति । अथ प्रमात्वविरुद्धजातिरप्रमात्वं तत्राह । तद्विरुद्धेति ।

एवं सति को दोष इत्यत आह । तथा चेति । निरालम्बनमिति । न स्मरणे व्यभिचारः । विपर्ययो यदि स्मृत्यन्यत्वे सति प्रमाणं स्यात् ज्ञानं न स्यात् पटवदित्यर्थः । व्याप्यव्यापकभावानुपपत्तिमाह । सामान्यं चेति । गुणजातौ परापरभावानुपपत्तिर्न दोषायेति प्रमादो निर्मूल एव, दूषकताबीजस्य तुल्यत्वात् । गत्वतारत्वादावन्यथोपपत्तेर्वक्ष्यमाणत्वात् । तथा चेति ।

विपर्ययोऽपि दत्तजलाञ्जलिः स्यात्। साक्षात्कारित्वं च यदि परं तदा ऽसाक्षात्कारवत्यो ऽनुमितिप्रभृतयो न प्रमाः स्युः। अथापरं, विपर्ययबुद्धिर्न साक्षात्कारवती स्यादप्रमात्वादिति। यथार्थत्वमात्रमिति चेन्न। स्मरामीत्यत्रापि प्रमिणोमीति बुद्धिव्यपदेशप्रसङ्गात्। इष्ट एवायमिति चेत् न, ईश्वरेच्छामात्रेण लौकिकप्रयोगाप्रयोगयोर्नियन्तुमशक्यत्वात्। तेनैवायं प्रमाणशब्दो

जातेर्व्याप्यवृत्तितानियमात्। न च संयोगात्यन्ताभावस्य यथा कर्मादौ व्याप्यवृत्तित्वे ऽपि संयोगवत्यव्याप्यवृत्तित्वमनुभवबलात् तथा प्रमात्वतदत्यन्ताभावयोरपि तथाऽस्त्विति वाच्यम्। अवच्छेदभेदं विना विरुद्धयोरेकत्रासमावेशादप्रतीतेश्च। न च विषय एवांशरूपः प्रमात्ववृत्तावच्छेदकः, तद्विषयत्वस्य भ्रमे ऽपि सत्त्वात्। अतिप्रसक्तस्य चानवच्छेदकत्वात्। अन्यस्य चावच्छेदकत्वे तदेव प्रमात्वमस्तु आवश्यकत्वात् किं जात्या। तथापि विपर्यये धर्म्यंशे स्मृतिरूपायायाथार्थ्यमात्रमस्त्विति चेत्। न। तथा सत्यावश्यकत्वेन यथार्थानुभवत्वस्यैव प्रमात्वापत्तेः प्रमाव्यवहारस्योभयत्रापि तुल्यत्वेन विनिगन्तुमशक्यत्वाच्च। ननु यथा परमाणुं साक्षात्करोमीत्यत्र साक्षात्कारित्वं न परमाणुना निरूप्यते किं तु तज्ज्ञानेन, अन्यथा परमाणोः प्रत्यक्षत्वापत्तेः, तथात्राप्यबाधितेन धर्मिणा प्रमात्वं निरूप्यते न तु बाधितेनापि रूपेण। मैवम्। ज्ञानत्वज-

यथार्थज्ञानमात्रं नियतः कुत इति चेत्। न। तस्यापि लौकिकप्रयोगोऽनियतत्वात्। अस्त्येव लोकप्रयोग इति चेत्। न। महर्षिभिस्तदभियुक्तैः स्मृतिफलस्य प्रमाणत्वेनापरिसङ्ख्यानात्। उक्तेष्वन्तर्भावादपरिसङ्ख्यानमिति चेत्। न। प्रत्यक्षस्याऽसाक्षात्कारिफलत्वानुपपत्तेः। लिङ्गशब्दादेश्च सत्तामात्रेण(१) प्रतीत्यसाधकत्वादिति।

किं च स्मृतेर्याथार्थ्यमपि कुतः। न हि यादृशोऽर्थः स्मर्यते यदा तादृश एवासौ तदा, पूर्वावस्थाया वर्त्तमाने

ज्ञानत्वव्याप्यजातिविषयविशेषनिरूप्यत्वाभावात्। प्रत्यक्षत्वमपि न परमाणुमात्रेण, नापि ज्ञानमात्रेण निरूप्यते किं तु परमाणुविषयकज्ञानेन। ज्ञानोपनीतत्वेन परमाणोरपि तत्र प्रत्यक्षत्वाच्च। अपि चैवं ज्ञानत्वानुभवत्वाभ्यां प्रमात्वस्यान्यूनानतिरिक्तव्यक्तिवृत्तित्वापत्तिः। यथार्थत्वमात्रमिति। प्रमापदप्रवृत्तिनिमित्तमिति शेषः। उक्तेष्विति। प्रत्यक्षादिप्रमाणेष्वेव संस्कारान्तर्भावान्न पृथक् कथनमित्यर्थः। प्रत्यक्षस्येति। तथा च स्मृतेरसाक्षात्कारित्वात् तत्फलकस्य संस्कारस्य न प्रत्यक्षेऽन्तर्भावः, अज्ञातस्यैव तस्य स्मृतिजनकत्वात् न ज्ञायमानकरणेऽनुमानादावन्तर्भाव इत्यर्थः।

एतावता स्मृतेर्यथार्थत्वमवगम्य तदप्रामाण्यमुपपादितमिदानीं स्मृतिरयथार्थत्वादेव न प्रमेत्याह। किंचेति। तदुपपादयति। न हीति। स घट इति स्मृत्या पूर्वावस्थाविशिष्टो घटो विषयी-

(१) सत्तामात्रेणाप्रतीत्य इति २ — भा० - पु०।

निवृत्तत्वात् अनिवृत्तौ हि पूर्वतैव न स्यात्। न च निवृत्तपूर्वावस्थतयैव तमर्थं स्मृतिरालम्बते, पूर्वावस्थानिवृत्तेरननुभूतत्वात् अननुभूते चार्थे स्मृतेरप्रवृत्तेः॥

ननु समानविषयत्वे ऽपि स्मृत्यनुभवयोरनुभवो यथार्थो न स्मृतिरिति कुत एतत्?, अनुभवकाले तस्यार्थस्य तावदवस्थ्यात् स्मृतिकाले त्वतादवस्थ्यात्। ननु पूर्वं तावत्तदवस्थ एवासावासीत् एतावतैव ज्ञानमस्तु यथार्थम्। न। पाकरक्ते ऽपि श्यामप्रत्ययस्य यथार्थत्वप्रसङ्गात्। नन्वतीतः श्याम इति प्रत्ययस्तत्र

क्रियते घटो ऽयमिति वर्त्तमानविषयकानुभवात्। न च स्मृतिकाले पूर्वावस्था वर्त्तमानेत्यर्थः। पूर्वतैवेति। वर्त्तमानध्वंसप्रतियोगिन एव पूर्वत्वादित्यर्थः॥

कुत एतदिति। स्मृत्यनुभवयोरन्यूनानतिरिक्तविषयत्वात्समानविषयनिबन्धनत्वाच्च प्रमात्वस्य, स्मृतेरेवाप्रमात्वं न त्वनुभवस्येति कुत इत्यर्थः। उत्तरम् अनुभवेति। घटो ऽयमित्यनुभवकाले घटस्य वर्तमानत्वात् स्मृतिकाले त्ववर्तमानत्वात् तुल्यविषयत्वे ऽप्यनयोर्वैषम्यमित्यर्थः। नन्विति। पूर्वं वर्तमानैव पूर्वावस्था आसीदित्यत एव स्मृतिः तद्वर्तमानत्वविषयापि यथार्था स्यादित्यर्थः। पाकरक्त इति। यदि यदा कदाचिद्वर्तमानत्वेनैवातीतस्यापि वर्तमानत्वप्रतीतिर्यथार्थेति भावः। नन्वतीता पूर्वावस्था स्मृत्या न स्वकाले वर्तमानत्वेन विषयीक्रियते येनैतदयाथार्थ्यं स्यात् किं त्वतीतस्या-

यथार्थ एव। सत्यम्। तद्विषयस्य तदानीमेव तद-
वस्थत्वात्। न तु स्मर्यमाणार्थस्तदानीं तदवस्थः

तीतत्वेनाविषयत्वेऽपि यो वस्तुगत्याऽतीतः स (१) एव स्मृतेर्विषयः
तथा चेदानीमतीतावस्थाविशिष्ट इति स्मृतेरभावात् क्वायथार्थत्वम्।
एवं पाकरक्ते ऽपीदानीं श्याम इति प्रतीतिर्नास्त्येव, किन्तु श्याम
इति प्रतीतिः सा च कदाचिच्छ्यामत्वे ऽप्युपपन्नेति नायथार्था।

अत्र तत्तेदन्ते स्मृत्यनुभवविषयावखण्डावेवोपाधी कृतधर्मवि-
लक्षणौ। एवं च इदन्तानुभवजन्यसंस्कारेणेदन्तैव तत्तया स्मार्यते।
न च तत्तायाः क्वचिदनारोपे कथं तदारोपः स्यादिति वाच्यम्
प्रत्यभिज्ञायां तत्तांशे यथार्थत्वात्। इदन्तानुल्लिख्यनुभवप्रभवे ऽपि
स्मरणे धर्मान्तरमेव तत्तया भासते। अत एवायं घट इति न स्मृति-
रिति सर्वा स्मृतिरयथार्था चायथार्थानुभवाच्च प्रमुष्टतत्तांशा
च स्मृतिर्न भवत्येव। हरिहराद्यनुचिन्तनं च कविकाव्यादि-
मूलज्ञानवन्मनोरथनिर्मितज्ञानसाकाङ्क्षपदानुस्मरणप्रभवमनुभवरू-
पमेवेति रत्नकोषकृतः।

तन्न। स्मृतेः पूर्वमिदन्त्वोपस्थितिं विना तत्र तत्तारोपाऽसम्भवात्।
आरोपविषयोपस्थितिं विनाऽऽरोपासम्भवात्। तथाप्यंशे याथार्थ्या-
परिहाराच्च। किं च तत्तांशे ऽननुभूतगोचरत्वेन स्मृतेः संस्कारसीमा-
लङ्घने इदन्ता तत्तया स्मर्यत इत्यत्र मानाभावः। घट एव कदाचित्
तत्तया स्मर्यत इत्येवास्तु लाघवात्। न च तत्तायास्तत्र सत्त्वान्ना-
रोप इति वाच्यम्। इदन्तायामपि तत्तास्तित्वेनारोपासम्भवात्॥

(१) सत्र इति २—धा०—पु०।

अत्र सम्प्रदायविदः स घट इति स्मृतौ तत्ताविशिष्टस्य वर्तमानता भासते। संस्कारस्य वर्तमानज्ञानसामग्रीसहितस्यैव हेतुत्वात्। सो ऽयमिदानीमिति प्रत्यभिज्ञायां तथा कल्पनात्। गेहे स घट इति स्मरणान्निष्कम्पप्रवृत्तेश्च. अन्यथा तत्ताविशिष्टस्येदानीं संशये सा न स्यात्। न च वर्तमानांशे ऽननुभूतविषयत्वं स्मृतेर्वर्तमानत्वेनानागतवर्तमानस्य पूर्वमनुभवात्। एवं च स्मृतेस्तथाभूतस्य वर्तमानता विषयः तच्च विशिष्टस्य विशेषणस्य वा वर्तमानत्वाभावात् स्मृतिरयथार्थैव।

अस्मत्पितृचरणास्तु विवादपदं स्मृतिः स्वविषयवर्तमानत्वविषया अतीतानागताविषयत्वे सति प्रतीतित्वात् प्रत्यभिज्ञानवत्। प्रतीतेः समयविशेषविषयत्वनियमात्। ज्ञानसामग्रीमहिम्ना चाऽननुभूतं समयांशे स्मृतेन तत्र संस्कारो व्यापारो ऽन्यथासिद्धत्वात्। अत एव पाकरक्ते श्यामाऽयमिति प्रतीतेरयथार्थत्वव्यवहारः। श्यामत्वे वर्त्तमानत्वेनानवगमात्। अत एवातीतानागतान्यगोचरत्वे विद्यमानधूमेन पर्वते ऽग्निरित्यनुमितेर्वर्त्तमानाग्निविषयत्वादिदानीमग्निरिति निश्चयात् प्रवृत्तिः अन्यथेदानीं तत्संशये प्रवृत्तिर्न स्यात् कालगर्भव्याप्त्यप्रतिसन्धाने गत्यन्तराभावादिति स्मृतिरयथार्थेति श्रीतत्त्वचिन्तामणावाहुः॥

अथ कथं तत्ता? न तावदतीतानुभवविषयत्वम्, अतीतानुभवविषयत्वस्या ऽनुभवे ऽविषयत्वेन स्मृत्या तदुल्लेखानुपपत्तेः। न च तस्यानुभवाविषयत्वे ऽपि यदा ज्ञानान्तरेण ग्रहणं तदा स घट इति स्मृतिरन्यथा प्रमुष्टतत्तांशा घट इति वाच्यम्। अतीतानुभवविषयत्वस्यानुमितौ भाने ऽपि स इति बुद्धेरभावात्। तन्निश्चये ऽपि तत्ता-

तस्मात् स्मृतिरयथार्थैव । यथानुभवं तु भवेत् ।

संशयात् । सहप्रयोगानुपपत्तेश्च । नाप्यतीतधर्मवैशिष्ट्यं तत्ता, सहप्रयोगश्च धर्मविशेषातीतत्वमादाय समाधेयः, क्वचित्तन्निश्चये ऽपि तत्तासंशयश्च निश्चिततरधर्मविशेषविषयत्वेनोपपत्स्यत इति वाच्यम् । यदि हि वस्तुगत्या यो ऽतीतधर्मः तद्वैशिष्ट्यं तत्ता, तदाऽनुभवे ऽपि तद्विषयत्वात्तत्तोल्लेखापत्तिः । नाप्यतीतत्वेन भासते यो धर्मस्तद्वैशिष्ट्यं, भासमानधर्मस्यातीतत्वेनानुभवाविषयत्वात् । प्रत्युत वर्तमानत्वेनानुभवात् स्मृतौ तत्तोल्लेखानुपपत्तेः । न चानुभवानन्तरं यत्र ज्ञानान्तरं तद्भासते तत्रैव स्मरणे तत्तोल्लेखो नान्यत्रेति वाच्यम् । अतीतधर्मवैशिष्ट्यानुमितौ तत्तोल्लेखानुपपत्तेः । अत एव नातीतसमयसम्बन्धस्तत्ता, अनागतगोचरस्मृतिप्रत्यभिज्ञयोस्तत्तोल्लेखानुपपत्तेः । इदन्ता ऽपि न तद्वृत्तिगुणादि, गुणादावभावात् । नापि प्रत्यक्षज्ञानगोचरत्वम्, अचाक्षुषत्वापत्तेरिति ।

उच्यते । अनुभवे य एव धर्मः कालो वर्तमानत्वेनाभासते स एव स्मरणे ऽपि, तयोरेकविषयत्वे ऽपि स्मृताविव तत्प्रयोगा उन्नेयाः । संस्कारज्ञानस्यैव तत्तच्छब्दप्रयोगहेतुत्वात् । प्रत्यभिज्ञाने तथा कल्पनात् । तत्रैव प्रत्यक्षानुभवेनेदंशब्दप्रयोगः । विषयकृतः स्मृत्यनुभवयोर्विशेषो नास्त्येव । अत एवाऽयं घट इत्यनुभवादयं घट इति न स्मृतिः । स घट इति स्मृतिहेतुश्च स घट इति नानुभवः सहप्रयोगश्च धर्मविशेषमादायेति ॥

यथा ऽनुभवमिति । येन रूपेणानुभवस्ताद्रूप्येणैव स्मृत्युपपत्ते-

तत्रानुभवस्य यथार्थत्वात् तदेकविषया स्मृतिरपि यथार्थेत्युच्यते। अत एवानुभवस्यायथार्थत्वे स्मृतिरविपरीतार्थाऽप्ययथार्थैव, यथा रज्जुं भुजङ्गतयाऽनुभूय विद्रुतस्य तथैव स्मृतिः। तस्मात् स्मृतेर्याथार्थ्यं याचितकमण्डनप्रायं नाजानिकम्। इदमेव पारतन्त्र्यपदवाच्यं कैश्चिन्निरुक्तिशून्यैरन्यथोपपन्नयत इति। तस्मादुभयथापि स्मृतेरन्यस्यानुभवत्वैकनियतं यथार्थत्वमेव प्रमापदस्य प्रवृत्तिनिमित्तं लोको ऽवधारितवान्, कथमन्यथा तत्रैव प्रमाशब्दं प्रयुङ्क्ते नान्यत्रेति यद्यपि, तथाऽपि धर्मिण्यपि स्मृतेः प्रामाण्यं माभूदित्याशयवान्

रित्यर्थः। यथार्थत्वव्यवहारं समर्थयति। तत्रेति। एतदेव द्रढयति। अत एवेति। यतो यत्रानुभवो न यथार्थस्तत्र स्मृतिर्यथार्थापि न व्यवह्रियत इत्यर्थः। अविपरीतार्था ऽपीति। अनुभवादनतिरिक्तार्था ऽपीत्यर्थः। नाजानिकं न स्वतन्त्रं, किं तु कारणानुभवानतिरिक्तविषयत्वे सति तद्याथार्थ्यपरतन्त्रमित्यर्थः। तेन क्वचिदनुमितेः स्वकारणलिङ्गपरामर्शयाथार्थ्याधीनयाथार्थ्ये ऽपि न दोषः, तस्याः स्वकारणलिङ्गपरामर्शविषयातिरिक्तविषयत्वात्। शाब्दानुभवस्य तु स्वकारणसमानविषयकाप्तज्ञानयाथार्थ्यापेक्षयाथार्थ्ये ऽपि न प्रतिपाद्यज्ञानयाथार्थ्यापेक्षत्वम्, अत्र तु स्मर्तुरेवानुभवयाथार्थ्यं स्मृत्या स्वयाथार्थ्यायापेक्ष्यत इति भावः। उभयथापीति।

प्रागुक्तयुक्तिकं लोकप्रयोगमेवाश्रितवान्। तदिदमुक्तं लोकश्चेति ॥ [१४।२५]

एवं तावद्यथार्थो ऽनुभवः प्रमा तत्साधनं च प्रमाणमिति स्वलक्षणमाशङ्कितातिव्याप्तिनिराकरणे-

---

स्मृतेर्याथार्थ्ये ऽयाथार्थ्ये चेत्यर्थः। प्रागुक्तयुक्तिकमिति। ज्ञानत्वादिकं न प्रवृत्तिनिमित्तमित्याद्युक्तयुक्तिः।

एवं तावदिति। ननु यथाशब्दः सादृश्यवाची तत्र सादृश्यमात्रं वा विवक्षितं सर्वथा सादृश्यं वा, नाद्यः भ्रमे ऽतिव्याप्तेः, नान्त्य, ज्ञाने घटत्वादिना सादृश्याभावात्। न चाबाधितत्वं यथार्थत्वम्, बाधस्य विपरीतप्रमारूपत्वेनाऽऽत्माश्रयात्। नापि संवादित्वं, तद्धि न ज्ञानान्तरेण तथोल्लिख्यमानत्वं, भ्रमसाधारण्यात्। नापि समर्थप्रवृत्तिजनकत्वं, उपेक्षाप्रमायामव्याप्तेः। योग्यतायाश्च प्रमात्वनिरूप्यत्वात्। नापि विशेष्यनिष्ठात्यन्ताभावाप्रतियोगिधर्मप्रकारकानुभवत्वं, संयोगादिप्रमायामव्याप्तेः। अभावे व्याप्यवृत्तित्वविशेषणे च संयोगभ्रमे ऽतिव्याप्तेः। तदत्यन्ताभावस्यैकत्वात्। न हि प्रतियोगिभेदादिवाधिकरणभेदादप्यभावभेदः, एकैकविशेष्यावृत्तिनानाप्रकारकसमूहालम्बनाव्याप्तेश्च। न च प्रकारस्यैकविशेष्यवृत्तितया न विशेष्यावृत्तित्वमिति वाच्यम्। अप्रमाप्रमारूपसमूहालम्बनाऽतिव्याप्तेः। यावद्विशेष्यावृत्तित्वविवक्षायामेकविशेष्यके यावदर्थाभावात्। अथ परज्ञानं ज्ञानत्वेन तद्विशेषं च घटत्वेन जानतो घटमयं जानाति न वेति संशयाद्विषय-

नादुष्टमिति समाहितम्। न चैतन्मीमांसकस्यानभिमतम्। न हि तेनाप्यव्याप्यातिव्याप्ती प्रसञ्जयितुं शक्येते। न ह्यस्ति सम्भवो यथार्थो ऽनुभवो न प्रमेति।

ज्ञानस्वरूपातिरिक्तस्य स्वाश्रयस्वभावादिविशेषणताविलक्षणस्य विषये ज्ञानविशेषणतारूपस्य विषयत्वस्यावश्यं स्वीकाराद्विषयताश्रया विशिष्टः ज्ञानं तत्प्रतियोगि भ्रमे शुक्तिवृत्तिविषयता व्यधिकरणेन रजतत्वेनावच्छिद्यते, रजतवृत्तिश्च समानाधिकरणेन रजतत्वेन, तथा च विषयतासमानाधिकरणप्रकारको ऽनुभवः प्रमेति स्यात्। न स्यात्। निर्विकल्पकाव्याप्तेः। स्वव्यधिकरणधर्मानवच्छिन्नविषयताप्रतियोग्यनुभवः प्रमा, समूहालम्बने च प्रतिविशेष्यं विषयताभेदादेकवृत्तिविषयता नापरवृत्तिना ऽवच्छिद्यत इत्यतो नाव्याप्तिरिति चेत्। न। भ्रमांशप्रमायामव्याप्तेः। न हि विषयता व्यधिकरणेनावच्छिद्यते सा तदनवच्छिन्ना विरोधात्। अतिरिक्तविषयताया अभावाच्च मानाभावात्। सामान्यतो ज्ञाने ज्ञाते तस्य क्वचिद्विशेषणतेति सामान्यतो विशेषणताज्ञाने ऽपि घटमयं जानाति न वेति संशयतादवस्थ्यात्। तस्माद्घटतज्ज्ञानयोः स्वरूपग्रहे ऽपि तदीयत्वं तद्विषयत्वं न गृहीतमिति तत्र संशयः तदीयत्वं च तत्स्वभावसम्बद्धत्वं यथा तत्र विशेषणतायाम्, अन्यथा ऽनवस्थानात्। अन्यत्रापि स्वरूपसम्बन्ध एषैव गतिः अन्यथा सामान्येनाभावसमवाययोर्ग्रहे ऽधिकरणे च ज्ञाते तयोः संशयो न स्यात्। अधिकरणतदुभयस्वरूपाणां ज्ञातत्वात्। तत्राप्यभावसमवाययो-

तल्लक्षणे त्वस्माकं कुतो विप्रतिपत्तिरित्यत आह । अनधिगतार्थगन्तृत्वं चेति ॥ [१४:२७]

उपलक्षणं चैतत् । नित्यपदार्थेष्वनधिगतत्वं नाम

विशेषणताविशेषो न ज्ञात इति चेत् । न । सामान्यतस्तद्ग्रहेऽपि तत्संशयात् । नापि विशेष्याऽवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकधर्मप्रकारकानुभवत्वम्, अव्याप्यवृत्तिप्रमायामव्याप्तेः । मूले वृक्षः कपिसंयोगवानित्यबाधितानुभवात् संयोगवदन्योन्याभावस्याप्यव्याप्यवृत्तित्वात् । अवच्छेदभेदेन भेदाभेदयोरविरोधात् ।

अत्रास्मत्पितृचरणाः । यत्र यदस्ति तत्र तदनुभवः प्रमा । यत्र यन्नास्ति तत्र तदनुभवोऽप्रमा । इदं रजतमिति ज्ञानमिदन्त्ववति तदनुभवत्वात् प्रमा, रजतत्वाभाववति रजतत्वानुभवत्वादप्रमा । समूहालम्बनं च नाप्रमा, एका भाववति तदप्रतीतेः । न चैवमव्याप्यवृत्तिभावाभावयोरेकत्र प्रमाप्रमयोः प्रसङ्गः, तदभाववति तदनुभवत्वादिति वाच्यम् । भिन्नभिन्नावच्छेदेन हि वृक्षे संयोगतदभावौ, न वृक्षमात्रे, विरोधादननुभवाच्च । एवं च यत्र वृक्षे संयोगो न तत्र तदभावः । न च यत्तद्भ्यां लक्षणेऽननुगमो, लक्ष्यस्याननुगतत्वात् । न हि या प्रमा सा सर्वत्र प्रमा, किं तु क्वचित् । तथा च किं ज्ञानं कुत्र प्रमेत्यपेक्षायां यथोक्तमेव लक्षणं युक्तमिति सङ्क्षेपः ॥

सामान्यतः प्रमेयत्वादिना सर्वेषामेव सर्वैरवगमादनधिगतत्वं न सम्भवतीत्यभिप्रत्याह । उपलक्षणं चेति । अथ विशिष्यानधि-

नास्त्येव। यदि नेह जन्मनि, जन्मान्तरे ऽप्यधिगमात्। यदि न प्रत्यक्षेणानुमानोपदेशाभ्यामपि। अनित्येष्वपि प्रायश उपलब्धानामेवोपलम्भाच्च। अन्यथा च प्रत्यभिज्ञानं दत्तजलाञ्जलि स्यात्। ततश्च स्वरूपतो ऽप्यनधिगतत्वं बह्वाकुलयेत्। प्रकारतोऽपि भूयोभूयः स्तम्भादिष्वनुभूयमानेषु न कश्चिद्गुणप्रकारः प्रतिक्षणलब्धजन्मापवर्गः परिभाव्यते। कर्मकृतो ऽप्याशुतरविनाशी न प्रतिक्षणमपूर्वः। न च चतुःपञ्चक्षणावस्थायिनि अपि तस्मिन्नेकमेव ज्ञानं जनयित्विन्द्रियादिकमुदासीनमनागतकर्मादिजन्म प्रतीक्षते। ततश्च

गतत्वं विवक्षितं तत्राह। नित्येति। अनधिगतत्वं च यदि धर्मपरं तत्राह। अन्यथा चेति। अथ धर्मिपरं तत्राह। ततश्चेति। प्रकारकृते ऽनधिगतत्वे दोषमाह। प्रकारत इति। प्रतिक्षणेति। यद्यपि जन्ममात्रेणैवाधिगतत्वमुपपद्यते तथाप्यपवर्गग्रहणं दृष्टान्तार्थमित्येके। ध्वंसेनैवापूर्वत्वप्रतिपादनार्थमपवर्गग्रहणमित्यन्ये। अत्र च ध्वंसस्यापि जनितत्वेनैव लाभे गोवृषन्यायेनाभिधानम्। कर्मकृत इति। कर्मणा जनितो विभागादिः कर्मणैवाकृतो विशिष्टस्तेन कर्मभेदो ऽपि नास्तीत्यर्थः। अथ यत्किञ्चिद्विषयपरत्वेनानधिगतत्वं तत्राह। ततश्चेति॥

सर्वजन्मान्तरोपलम्भादन्ये तदुत्तरकालप्रत्यया धारया विच्छेदेन वा भवन्तो न प्रमाणं स्युरित्यर्थः ॥

शङ्कते। न चेति। [१४।२८] यद्यपि स्वरूपस्य प्रकारस्य वा तथाविधस्य तादवस्थ्यं, तथापि प्रत्यक्षज्ञानधारायां वर्त्तमान एवार्थः परिस्फुरति। न च क्रमभाविनामेक एव वर्त्तमानकालो विषयः। नानाप्रमातृवज्ज्ञान-यौगपद्यप्रसङ्गात्। प्रत्यभिज्ञानानुपपत्तिश्च, ज्ञानानेक-त्वेऽपि एककालावस्थानाकलनात्। तस्मात् पूर्वपूर्व-ज्ञानैरनाकलित एव वर्त्तमानोऽर्थ उत्तरोत्तरैरव-सीयत इत्यनधिगतार्थत्वमेव तत्रापीत्यर्थः ॥

परिहरति। परमेति।[१५।१] न तावत् प्रतिक्षणवर्त्त-

ननु स्थूलकालभेदमात्रेण प्रतिक्षणभाविनो ज्ञानस्य नानधि-गतार्थत्वमित्यत आह। यद्यपीति। तथा च प्रत्यक्षस्य वर्त्तमाना-र्थग्राहित्वनियमेन स्वाश्रयक्षणविशिष्टस्तम्भादिग्राहकत्वेनागृहीतत्वं भविष्यति, अन्यथैकसमये ज्ञानयौगपद्यप्रसङ्ग इत्यर्थः। प्रत्यभि-ज्ञेति। एकस्य पूर्वापरकालावस्थानं प्रत्यभिज्ञानविषयो यदि च तेनापि पूर्वानुभवकालावस्थानमेव विषयीकृतं तदा तन्न स्यादिति तदसिद्धौ स्थैर्यमपि न सिद्ध्येदित्यर्थः ॥

ननु परमसूक्ष्माणामभानेऽपि प्रकारान्तरेणैव वर्त्तमानत्वम-ध्यक्षगोचरो भविष्यतीत्याशयेन प्रकारान्तरं निराकरोति। न

मानत्वं सौगतमतवद्वस्तुनः स्वरूपोत्पादः, नापि साङ्ख्य-वद्वस्तुस्वरूपस्थैर्येऽपि परिणतिभेद एव मीमांसकैः स्वीक्रियते । नापि धर्मभेद एव कश्चित् प्रतिक्षणापूर्वो वर्त्तमानाऽपरनामा समस्ति । न च तैरभ्युपेतः । न च कालः प्रत्यक्षगोचरो नापि भिन्नस्वभावः । तस्मात् कालकलाभेदका उपाधय एव कालभेदः तत्प्रत्यक्षमेव कालभेदप्रत्यक्षमिति परमार्थः । तत्र न तावत् प्रतीय-मानस्तम्भादिसंसृष्टा उपाधयः सन्तीत्युक्तम् । ज्ञात-तायाश्च निराकरिष्यमाणत्वात् । धारावहनबुद्धिषु तदु-भासनाच्च । प्रतीयमानेतरसंसृष्टास्तूपाधयस्तज्ज्ञानसं-सर्गिणो वा स्युरन्यथा वा, न तावत् स्तम्भादिषु ज्ञाय-

तावदिति । नचेति । उक्तं—भूयोभूयःस्तम्भादिष्वित्यादिना । ननु यथा भट्टानां ज्ञानानाकलनेऽपि ज्ञातोऽयमिति बुद्धिरध्यक्षा ज्ञानो-पाधिको भवति तथा क्षणानामनाकलनेऽपि तदुपहितोऽर्थो धारावहनबुद्धीनां विषयः स्यात् । न । अननुभूतोपाधेरप्युपहित-प्रत्यये दण्डाननुसन्धानेऽपि दण्डिधीप्रसङ्गादिति भावः । अथ पूर्वपूर्वज्ञानाहिता ज्ञातता उत्तरोत्तरज्ञाने भासत इति तद्विशि-ष्टानुभवादगृहीतग्राहित्वं स्यात्तत्राह । ज्ञाततायाश्चेति । स्मृता-वपि स्मृतत्वोल्लेखापत्तावनधिगतार्थत्वेन प्रमात्वप्रसङ्गादिति भावः । धारावहनबुद्धिष्विति । न हि स्तम्भोऽयं स्तम्भोऽयमित्यत्र ज्ञातत्व-

मानेषु तदितरसंसर्गिणः क्षणभङ्गुराः केचनावश्यं तज्ज्ञानसंसर्गभाजो भवन्ति । क्वचिन्नभवन्त्यपीति चेत् । तत्रैव तद्धियां प्रमाणता स्यात् । यत्र तु तदेकज्ञानसंसर्गिण उपाधयो न सन्ति तत्र धारावाहिकबुद्धीनामप्रमाणत्वमेव स्यात् । तथाविधा एव च विचारविषयत्वेनाभिप्रेताः ज्ञानान्तरगोचरा विषयान्तरसंसर्गिण उपाधयो भविष्यन्तीति चेत् एवं तर्हि धारावहनबुद्धयो न स्युरेव । न खलु प्रमाणान्तरेण इन्द्रियान्तरेण तेनैव वा तद्धर्मिपरित्यागाद्धर्मान्तरे ऽनुभूयमाने विवक्षितैकविषयबुद्धिधारासम्भवः । इष्ट एवायमर्थ इति चेत् । न । अपूर्वापूर्वोपाध्युपनिपातनियमे प्रमाणाभावात् । अनुपनिपातिनां च ज्ञानान्तरेणाऽप्यनाकलनात् । अत एव घटोऽयं घटोऽयमिति बुद्धिसहस्रस्यापि न विषयकृतं विशेषमुपलभा-

---

मपि भासत इत्यर्थः । अन्यथा वेति पक्षमुत्थापयति । ज्ञानान्तरेति । एवं तर्हीति । यदि स्तम्भादिज्ञानाद्यज्ञानानन्तरमन्यसंसृष्टोपाधिविषयकं तदुपनीत एवोपाधिस्तम्भादिज्ञानविषयः स्यात् तदानन्तरा तत्स्मरणादिना निरन्तरायत्वाभावाद्धारावहनबुद्धिरेव न स्यादित्यर्थः । इष्ट एवेति । अन्यूनानतिरिक्तविषया अनेकबुद्धयो

महे। अनुपलभ्यमानस्य तु विषयत्वकल्पनायां सर्व-सर्वज्ञतापत्तिरिति। तस्मात् स्तम्भादिरेव प्रागभाव-निवृत्तिप्रध्वंसाभावानुत्पत्तिरूपो वर्त्तमानः। तदव-च्छिन्नः कालो ऽपि वर्त्तमानः। स च तथाविधो ऽनेक-ज्ञानसाधारण एव। न चैतावता ज्ञानयौगपद्या-पत्तिः, सूक्ष्मकालापेक्षया क्रमसम्भवात्। न च सूक्ष्मोपाधीनामप्रतीतिश्चेदतो ऽसम्भव एव, कार्य-क्रमेणैवोन्नीयमानत्वात्। नापि प्रत्यभिज्ञानानुपपत्तिः, पूर्वज्ञानविषयानुसन्धानमेव हि प्रत्यभिज्ञानं तच्च ज्ञा-नक्रमादेवोपपन्नम्। तस्मात् कालतदुपाधिप्रत्यक्षत्वे

ऽसिद्धा एवेत्यर्थः। धारावाहिके मानमाहुः—अयं चैत्र एतदीय-घटो ऽयमितिज्ञानभिन्नैतदन्यूनानतिरिक्तविषयैतत्समानकालीन-ज्ञानवान् अनीश्वरात्मत्वात्। मैत्रवत्। सूक्ष्मकालापेक्षयेति। स्व-रूपसत्क्रमिकक्षणोत्पत्तिकत्वेन ज्ञानायौगपद्यात् स्थूलकालोपाधि-मादाय वर्त्तमानत्वाध्यक्षस्याप्युपपत्तेरित्यर्थः। न चेति। क्षणो न प्रत्यक्षः स एव हि प्रत्यक्षो यः पूर्वापरकालवर्त्ती सन् ज्ञानसमान-कालो न च क्षणस्तथेत्यर्थः। कार्यक्रमेणैवेति। ज्ञानयौगपद्यनिषे-धादनेकज्ञानोत्पत्त्यैव तदनुमानमित्यर्थः। नापीति। प्रत्यभिज्ञा-नस्यैकत्र पूर्वापरकालवैशिष्ट्यविषयकतया पूर्वकालसम्बन्धानुभवं विना तदसम्भवादित्यर्थः। वेदात् क्रमोत्पन्नवेदार्थगोचरधारावहन-

ऽपि न सर्वत्र सूक्ष्मोपाधिसंसर्गो, नापि तत्प्रतीतिः। तदिदमुक्तम्। परमसूक्ष्माणामिति ॥ [१५।१]

एतेनैतन्निरस्तं सिद्धे साधकतमत्वाभावादिति। न हि साधकतमस्य (१) तथात्वं साधकतमान्तरापेक्षया, किं तु प्रधानक्रियाकारकान्तरापेक्षया। अन्यथा यत्र करणानां समुच्चयस्तत्र परस्परापेक्षया ऽनतिशयितत्वादकरणत्वापत्तेः करणानां समुच्चयः क्वचिदपि न स्यात्। इतरकारकापेक्षया तु धारावाहिकबुद्धिष्वपि प्रमाणस्यातिशयित्वमस्त्येव। यत्तु छिन्ने कुठारस्याकारणत्वमिति, तत् छिदालक्षणफलाभावात्। न च ज्ञाते ज्ञानान्तरासम्भवो येनाचाफलत्वादिवाकरणत्वं

बुद्धौ वर्त्तमानकालाभानात्तत्रानधिगतार्थत्वमेतावतापि नोपपादितम्। अपि चाधिकविषयत्वसंशये प्रमात्वसंशयाननुभव इति भावः॥

न हीति। न ह्येकस्य कारणस्य कारणान्तरापेक्षयैवातिशयस्तमवर्थः, किं तु कर्त्राद्यपेक्षः अन्यथाऽनेककरणनिष्पाद्यमेकं कार्यं न स्यात्। दृश्यते चानेकदीपचक्षुरादिकरणकमेकं प्रत्यक्षमित्यर्थः। तच्छिदालक्षणेति। अवयवसंयोगध्वंसस्य छिदात्वादिति भावः। न च ज्ञाते ऽपीति। यावज्ज्ञानोत्पादकसाकल्ये कार्यविलम्बाभावात्। न चानुत्पन्नस्वसाध्यजातीयक्रिये व्यापारवत्त्वं करणत्वं

(१) साधकतमत्वस्य इति २ — पा० — पु० ।

भवेत् धारावाहिकज्ञानोत्पत्तिः । तस्माद्यो ऽनधिगतार्थ-बोधनं प्रमाणमिच्छति तस्य धारावाहिकबुद्धयो ऽप्रमाः प्रसज्येरन्नित्यर्थः ॥

न चेति ।[१५।२] प्रवृत्तिं प्राप्तिं च जनयदेव विज्ञानं प्रमा, तदर्थमेव प्रमाणानुसरणात् । आद्यं च तथा ऽतस्तदेव प्रमा । द्वितीयादीनां च न प्रवृत्तिप्राप्ति-हेतुत्वमतो नैतानि प्रमारूपाणि ततस्तज्जनकान्यपि न प्रमाणानीति तदेतदिष्यत एवेत्यर्थः ॥

न हीति । [१५।४] न ह्यप्रवर्त्तयदेव विज्ञानमर्थं प्रापयति । नापि हठादेव प्रवर्त्तयति । किं त्वर्थोप-दृष्टिरूपतया, सा च सर्वसमानेत्यर्थः । तदिदमुक्तम् प्रदर्शनं चेति ॥ [१५।६]

कारकान्तरसाधारण्यात् इतरव्यवच्छेद्यासिद्धौ च वैयर्थ्यादित्यर्थः ।

प्रवृत्तिप्राप्तिजनकमेव ज्ञानं प्रमेत्युपपादयति । प्रवृत्तिमिति । तदेतदिति । प्रवृत्तिप्राप्तिजनकानामेव प्रामाण्यमित्यभ्युपगन्तृ-मते तदजनकानां द्वितीयादिज्ञानानामप्रमात्वमिष्यत एवेतीष्टा-पादनमित्यर्थः ॥

न हीति । अप्रवर्त्तकाप्रापकयोरपि प्रमात्वात्तज्जननस्वरूप-योग्ययोरेव प्रमात्वम् । तच्च यथार्थानुभवत्वं तदविशिष्टमेव सर्वेषामित्यर्थः ॥

ननु तथापि प्रथमादेवापेक्षितसिद्धेः पुरुषस्य किं द्वितीयादिनेत्यत आह । पुरुषेति । [१५।७]

स्यादेतत् । वादिविप्रतिपत्तयो वार्त्तिककृता न निराकृता इत्यत आह । उपलब्धीति । [१५।१०] व्यापकस्याव्यापकविरुद्धत्वादनधिगतार्थगन्तुस्तेन रूपेण प्रमाणत्वमेवार्थान्निषिद्धमित्यर्थः ॥

सारूप्यशक्ती निराकरोति । हेत्विति । [१५।१३] तदीयतया ह्यर्थप्रतीतिं व्यवस्थापयन्नाकारः प्रमाणमिति कोऽर्थः ? । न तावत् तदीयतया नियतां प्रतीतिं जनयन्, स्वात्मनि स्वक्रियाविरोधात् । नापि ज्ञापयन् स्वात्मीभूत-

---

ननु पुरुषापेक्षयापि प्रामाण्ये द्वितीयादिज्ञानानां कुतः पुरुषानपेक्षितत्वमित्यत आह । नन्विति ॥

नन्वनधिगतार्थगन्तृत्वं प्रमात्वमित्यस्य प्रागेव निरसनात् किं पुनस्तदनुवादेनेत्यत आह । स्यादेतदिति । वार्त्तिकद्वारा वादिविप्रतिपत्तिनिरासार्थं तदनुवाद इत्यर्थः । व्यापकस्येति । धारावहनव्यापकस्य यथार्थानुभवत्वस्य तदव्यापकानधिगताधिगन्तृत्वविरोधादित्यर्थः ॥

स्वात्मनीति । न हि तदीयतया नियता प्रतीतिः नीलाकारप्रतीतेरन्या तथा चाकाराकारिणोरभेदे प्रतीत्यभिन्न आकारः कथं स्वजनकः स्यादित्यर्थः । स्वात्मीभूतेति । स्वविषये स्वात्मनि क्रियावि-

प्रतीतिं प्रति, ज्ञानान्तराजननात् (१)। नापि निश्चाययन्, आकारतद्गतोरेकत्वेन व्यावृत्त्योश्चैकनिश्चयगोचरत्वेन निश्चेयनिश्चायकत्वनियमानुपपत्तेः। नीलमहं जानामीत्याकारनिश्चयो,न चातो ऽपरः तदीयतानिश्चयो नाम ?। नीलमिदमित्याकारव्यवसायः प्रथममप्यनीलमहं जानामीत्यर्थकर्मकप्रतीत्यनुव्यवसाय इति चेत्। तत्किं? बुद्धावनिश्चितायामेवाकारो निश्चितः। न चैतत् सम्भवति, सामान्यनिश्चये विशेषानिश्चयात्। निश्चीयते एव परं न तदीयतयेति चेत्। अथ केयमर्थाकारात्त-

रोधेन ज्ञानानां ज्ञानान्तरा ऽजनकत्वादित्यर्थः। ज्ञानसामान्ये दोषमुक्त्वा तद्विशेषे दोषमाह। नापीति। अनुमापयन्नित्यर्थः। अत एवाग्रे ऽनुमितिं भावयन्निति वक्ष्यति। अत्रापि स्वात्मनि क्रियाविरोध एव युक्तिः। व्यावृत्त्योरिति। स्वज्ञानव्यावृत्त्यनाकारव्यावृत्त्योरित्यर्थः। व्यावृत्त्योरपि द्विभेदः प्रतियोगिभेदात् स चात्र नास्ति कचिदाप्तोपदेशादनिश्चितवृत्तस्य शिंशपानिश्चये ऽपि व्यावृत्त्योरलीकत्वेन न निश्चयनिश्चायकत्वमिति भावः। नीलमहमिति। स्वप्रकाशवादिनस्तवमते ऽर्थप्रतीतिरेव स्वविषयकतयाऽऽकारनिश्चायकत्वादित्यर्थः। अनुव्यवसाय इत्यत्र तदीयतानिश्चय इत्यनुषञ्जनीयम्।

तत् किमिति। आकारस्य बुद्ध्यभिन्नस्य बुद्ध्यनिश्चये निश्चया-

(१) जनकत्वात्—इति २—पा०—पु०।

दन्या तदीयता नाम(१)?। तदुद्भवत्वमिति चेत् । नन्वेवमनुमितिं भावयन्नाकारः प्रमाणम्। ओमिति चेत्। हन्त हतं तर्हि पामरप्रत्यक्षमतिरिक्तमर्थमनुमापयताऽऽकारेणा

नुपपत्तेर्न नीलमिदमित्याकारनिश्चयः प्रथममित्यर्थः । तदुद्भवत्वमिति । अर्थोद्भवत्वं तदीयता सा चार्थाकारे निश्चिते ऽप्यनिश्चितेत्यर्थः । नन्वेवमिति । एवमर्थोद्भवत्वानुमापकः स्वाकारः प्रमाणं न त्वाकारमात्रमित्यर्थः । हन्तेति । तर्हि पामरप्रत्यक्षाव्याप्तिः तेषामर्थोद्भवत्वापरामर्षादित्यर्थः ।

ननु पामरस्यापि सम्मुग्धमनुमानमङ्गीकृतमेवान्यथा धूमेनाग्न्यनुमानात्तेषामप्रवृत्तिप्रसङ्गात् । न आकारकादाचित्कस्यार्थोद्भवत्वेन नैयत्यापरामर्षे तत्सन्देहे वा पामरप्रत्यक्षानुपपत्तिप्रसङ्गात् । आकारपरामर्षस्यैवानुमितिहेतुत्वेनैवं सति प्रमाणत्वापत्तेश्च न त्वाकारस्य । न च परामृश्यमाणः स एव लिङ्गम्, असत्यप्याकारे तत्स्मरणादप्यनुमितेरिति भावः ।

अन्ये त्वनयैवानुपपत्त्यैवं व्याचक्षते अनुमितिं भावयन्नाकारः प्रमाणमित्यत्र नञः प्रश्लेषः तथा चानुमितेरर्थोद्भवत्वाभावात्तत तदीयतानिश्चयो न स्यादित्यर्थः । ओमितीति । माभूदनुमानं प्रमाणमित्यर्थः । हन्तेति । अनुमानाप्रामाण्ये साकारविज्ञानवादिना त्वया आकारकादाचित्कत्वेन लिङ्गेनार्थसिद्धिरङ्गीकृता न स्यादिति । हे पामर? प्रत्यक्षमर्थविषयं न सिद्ध्येत् आकारेणैवातिरिक्तमर्थमनुमा-

(१) या नाम इति २—पा० - पु० ।

व्यवस्थापितत्वात्। अपि च या क्रिया यत्करणफलत्वेन विवक्षिता जनयदेव तां तत्करणमिति लोकसिद्धम्। न हि छिदामजनयन्तो ऽपि चक्षुरादयस्तन्निश्चायकतामात्रेण छेदनतया व्यवह्रियन्ते, ऽपि त्वनिश्चाययन्तो ऽपि जनयन्त एव कुठारादयः। तदत्रापि प्रमां जनयदेव निश्चायकमपि प्रमाणमिति व्यवह्रियताम्। न तु तामजनयन्निश्चायको ऽप्याकारः, अन्यथा तु परिभाषां कुर्वता लोको ऽप्रतिपादितः स्यात्। न च जन्यजनकयोस्तादात्म्यगन्धो ऽपीति।

एतेन शक्तिः प्रमाणमिति प्रत्युक्तम्। शक्तेः शक्यनिष्ठत्वात्। शक्यं च कार्यमुच्यते। प्रकाशनं चाऽऽत्मभूतत्वान्न तस्याः कार्यमिति। तदिदमुक्तम्। हेतुर्हेतुमद्भावस्येति॥ [१५.१३]

ननु यदि प्रमाणं सिद्धं किं तत्र प्रमात्रादिना

पयता बुद्धेर्व्यावृत्तिसिद्धेरित्यर्थः। नन्वाकारः स्वात्मभूतप्रमामजनयन्नपि तन्निश्चायकत्वमात्रेण प्रमाणं स्यादित्यत आह। अपि चेति।

एतेनेति। यदि शक्तिः प्रमाणं स्यात्तदा तत्कार्या प्रमैव शक्या प्रकाशात्मिका वाच्या शक्तिश्च शक्तिमतः प्रकाशाच्च भिन्नेत्यभेदे करणफलभावः पूर्ववदेव विरुद्ध इत्यर्थः॥

कर्त्तव्यं ?, न हि सिद्धेन सिद्धमेव साध्यते। न चान्यत्र चरितार्थस्यान्यत्र कारकत्वमस्ति। अथासिद्धं कथं प्रमाणं, न ह्यसिद्धं कारकं नाम ?। नाप्यकारकं करणं नाम?। नाप्यकरणं प्रमाणमित्यत आह। अयमर्थ इति। [१५।१७] करणीभूतस्य परशोः संयोगस्य-व्यापारीभूतस्येति शेषः। परिणतिविशेषः—सहकारिसमवधानम्। करणं व्यापार्योत्पाद्य वा फलार्थं कर्त्तव्यान्तराभावात् कर्त्तुश्चरितार्थता। करणस्य तु फलेन विना ऽपर्यवसानमचरितार्थतेत्यर्थः ॥

अथ प्रमेयस्य कथं प्रमाणे चरितार्थत्वं ? न हि प्रमातृवत्तेनापि प्रमाकरणमुत्पाद्यते व्यापार्यते वेत्यत आह। प्रमेयस्य त्विति ॥ [१५।२७]

ननु संयोगो न करणं व्यापारतया निर्व्यापारत्वात् किं तु परशुः कारणं तथा च तस्यैवाव्यवहितव्यापारफलं द्वैधीभाव इति वक्तुमर्हतीत्यत आह। व्यापारीभूतस्येति। परशोरपि संयोगव्यापारवत एव कारणत्वात्तद्गोचरत्वमेवोक्तमित्यर्थः। साङ्ख्यानामिव न परिणतिभेदो ऽस्माकमित्यन्यथा व्याचष्टे। सहकारीति। यावत्सहकारिसमवधानमित्यर्थः। विवक्षितमर्थं सङ्क्षेपेणाह। करणमिति। अनेन यागवत् कर्त्तुः पारम्पर्यमात्रं विवक्षितं न तु कुम्भकारपितृवदन्यथासिद्धत्वं कर्त्तुरकारणत्वप्रसङ्गादिति भावः ॥

अयमाशयः। सर्वत्र हि कर्मकारकं करणफल-तद्व्यापारयोर्विषयतया व्यवतिष्ठते। तत्र फलविषयत्व-मस्य न कर्मत्वं प्रति प्रयोजकम्। असत्त्वेनाकारक-स्यापि फलविषयत्वात्। यदाह—"केवल"मित्यादि। करणव्यापारविषयत्वात् कर्मत्वं, न ह्यस्तिसम्भवः कर्म च न च करणव्यापारविषय इति, तत्र करणस्य व्यापार-विषयत्वाभावात् व्यापार एव न निर्वहेदिति तन्निर्वाह एवास्य चरितार्थत्वमिति। तदिदमुक्तम्। तत्रापी-न्द्रियसम्बन्धमात्र इति॥ [१५।२८]

न च करणमपि कर्तृव्यापारविषयस्तावन्मात्रेण

तुशब्दद्योत्यं प्रमाणात् प्रमेये विशेषमाह। अर्थेति। नन्विन्द्रियमपि प्रमेयवत् सम्बन्धमात्र एवोपक्षयात् प्रत्यक्षा-कारणं स्यादित्यत आह।

अयमिति। फलं ज्ञानादि। तद्व्यापारः-करणव्यापारः। अत्र विषयत्वं ज्ञानादिरूपकरणफलसंयोगरूपकारणव्यापारसाधारण-माश्रयाश्रयिभाव एव घटे ज्ञानमिति प्रतीतेः। फलेनापि विषयस्याऽऽश्रयाश्रयिभावादिति भावः। असत्त्वेनेति। अनुमेयादे-रित्यर्थः। तत्रेति। सव्यापारस्य करणत्वादसति व्यापारविषये निर्व्यापारस्य करणस्य करणत्वमेव न निर्वहतीति प्रमेयस्य करण-निर्वाहकतया चरितार्थत्वमिति विवक्षितत्वान्नोक्तदोष इत्यर्थः॥

चरितार्थमधिकव्यापारवत्त्वात् । नापि कर्मव्यापारविषयः करणं, नापि फलविषयस्तदुद्देशेन कर्मणः कर्त्रा ऽव्यापारितत्वात् । फलस्य तन्निरूपणाधीननिरूपणत्वात् येन कर्मवदस्य चरितार्थत्वं कल्प्येत । तस्मात् कर्त्तृकर्मणोश्चरितार्थत्वे ऽप्यचरितार्थमेव करणमिति ।

समवायित्वविषयत्वकृतां सन्निपत्योपकारकभ्रान्तिं प्रयोगाभ्यां निराकरोति । तत्सिद्धमेतदिति ॥

तावन्मात्रेणेति । करणाभावाद्विषयाभावेन व्यापाराभावान्निर्व्यापारस्य कर्त्तृत्वाभावेन करणमपि कर्त्तर्येव चरितार्थं स्यादित्यर्थः । अधिकेति । कर्त्तृव्यापारापेक्षयाऽधिकव्यापारत्वात् । कार्याव्यवहितपूर्ववर्तिव्यापारत्वादित्यर्थः । नापि कर्मेति । येन कर्मणि करणस्यापि चरितार्थत्वं स्यादिति भावः । नापि फलविषय इति दृष्टान्तार्थम् । यथा न फलविषयः करणं तथा न कर्मव्यापारविषयो ऽपीत्यर्थः । फलविषयत्वे सत्यपि कारकान्तराचरितार्थत्वस्य निर्वाहात् । अत्र साध्यद्वये यथाक्रमं हेतुद्वयमाह । तदुद्देशेनेति । करणोद्देशेनेत्यर्थः ॥

ननु प्रमातृप्रमेययोः फलं प्रति न साक्षात्साधनत्वमित्युभयवादिसिद्धमपि कुतः साध्यत इत्यत आह । समवायित्वेति । प्रमासमवायिकारणत्वमात्मनः, प्रमाविषयत्वं प्रमेयस्येति । तत्कृतायां तयोः प्रमायां साक्षाद्धेतुत्वमिति भ्रान्तिं निवारयितुं प्रयोगौ दर्शयतीत्यर्थः ॥

यद्यप्यनुमेयाद्यतीताद्यहेतुरेव तथापि सामान्य-निषेधो विशेषप्रकारमर्यादाश्रयेतेत्येतावतैव दृष्टान्त-त्वम्। तस्मात् "तदेव फलहेतुः"—सन्निपत्येति शेषः। कथञ्चिदिति-अनाहत्येत्यर्थः ॥

तथापीति। हेतुत्वसामान्याभावे साक्षाद्धेतुत्वाभावोऽप्यस्तीति तत्र साध्ये ऽनुमेयादेर्दृष्टान्तत्वमित्यर्थः। तदेवेत्येवकारेण कर्तृक-र्मणोः फलहेतुत्वं निवर्त्तितमिति भ्रमनिरासायाह। सन्निपत्येति। साक्षादित्यर्थः। कथञ्चिदिति प्रकारापेक्षायां साक्षात्तस्याऽप्य-न्वये विरोध इत्यन्यथा व्याचष्ट। अनाहत्येति। परम्परयेत्यर्थः।

ननु कारकान्तर इत्यत्र यद्यन्तरशब्दो विशेषमात्रवचनस्तदा व्यवच्छेद्याभावः, न हि विशेषमपहाय कारकसामान्यं केनचिज्ज-न्यते, यद्व्यवच्छेद्यते, अथा ऽन्यवचनस्तदा यदि कारणादेवान्यत्वं तदान्योन्याश्रयः, कर्त्तृकर्मणोरपि करणादन्यत्राचरितार्थत्वात्तत्रा-तिव्याप्तिश्च। नापि कर्त्तृकर्मणो अपेक्ष्यान्यत्वं, वैयर्थ्यात्। न हि कर्त्तृकर्मणोः किञ्चिच्चरितार्थं यद्व्यवच्छिद्येत, स्वरूपेण तयो-रजननात्। तद्व्यापारस्य कस्य चित् करणजन्यत्वेन करणस्यापि व्यवच्छेद्यत्वप्रसङ्गात्। नापि कर्त्तृकर्मणोः स्वरूपवचन एवान्तर-शब्दः, ताभ्यामेवातिव्याप्तेः। न हि तयोस्तत्रैव चरितार्थत्वम्। अन्तरशब्दाप्रयोगे च हस्ताद्यव्याप्तिः तस्याग्नौ कारके चरितार्थ-त्वात्। व्यापारवत् कारणत्वेन कारकत्वे हस्तादेः करणत्वस्याऽऽ-

वश्यकत्वात्। कर्त्रादावनन्तभावात्। सप्तमकारकापत्तेर्वा। न च व्यवधानात्तस्याहेतुत्वमेव, कर्त्तुरप्यहेतुत्वापत्तेरिति खण्डनकारः।

अत्राहुः। कर्त्तृकर्मस्वरूपोपादानपरे ऽप्यन्तरशब्दे ताभ्यामतिव्याप्तिनं दोषाय, तेनोपाधिना तत्रापि करणव्यवहाराङ्गीकारात्। "बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवाऽऽत्मना जित(१) इत्यादिप्रयोगात्। शास्त्रे ऽपि "प्रमेया च तुलाप्रामाण्यव"दिति (२) प्रयोगात्। न च कर्मणो ऽपि करणत्वे घटं पश्यतीत्यर्थे घटेन पश्यतीति प्रयोगः स्यादिति वाच्यम्। कर्मत्वकरणत्वयोरेकाश्रयत्वे ऽपि तयोर्भेदात्। तथा च कर्मत्वे ऽभिधेये कथमस्तु तृतीया, करणत्वे वा विवक्षिते कथं द्वितीया। तत्र तयोरसाधुत्वात्। साधकतमत्वविवक्षायां घटेन पश्यतीत्यपि भवत्येव। न चैतद्भाक्तं मुख्ये ऽनुपपत्त्यभावात्। न च वृथा विशेषणं कारकमात्रं करणमित्येवोच्यतामिति वाच्यम्। प्रवृत्तिनिमित्तकथनार्थत्वात्। न हीदं विशेषणं धर्मान्तरव्यवच्छेदाय, किं त्वेकत्रापि धर्मिणि तस्मात् करणव्यवहार एव न कारकान्तरव्यवहार इत्येतदर्थम्। अत एव प्रमेयमात्रं करणमित्येवोच्यतामित्यपास्तम्। चरमध्वंससाधारण्यात्। व्यवच्छेद्याभावाच्च॥

शिवादित्यमिश्रास्तु व्यापाराजनकव्यापारहेतुत्वं करणत्वमित्यनया वाचोभङ्ग्याऽभिहितम्। इन्द्रियादेर्योगादेश्च न करणत्वं, किं तु कारकान्तरत्वमेव। न च करणत्वानुशिष्टतृतीयाऽनुपपत्तिः।

(१) भगवद्गीता अ० ६। श्लो० ६।

(२) गौ. सू. अ. २ आ. १ सू. १६।

तदनेन कारकान्तरे ऽचरितार्थस्य हेतुत्वमेव करणत्वमिति करणलक्षणं दर्शयता कर्तृव्यापारगोचरः करणमित्यपि करणलक्षणं सूचितम्। तदेव टीकाकृता व्याख्यातम्। एतच्च "यद्वानिति" वार्त्तिके स्फुटीभविष्यति ॥

करणनिरूपकत्वमात्रेण परम्परया करणत्वसम्बन्धेन करणत्वविवक्षणात् हस्तादीनामपि कारकत्व ऽप्यकारणत्वात। तथैव तृतीयोपपादनात्। पाणिनिस्मृतन्यायमूलकत्वेन षट्कारकपरिगणनस्योपलक्षणत्वात्। "जनिकर्त्तुः प्रकृति" रिति (१) सूत्रयतः पाणिनेरपि प्रकृतिपदेन कर्त्रादिभ्यः कारकान्तरमस्तीति सम्मतम्। न च शब्दाभावमात्रात्कारस्य श्रोत्राकरणकत्वप्रसङ्गः विशेषणतायो अजन्यत्वेनाव्यापारत्वादिति वाच्यम्। कर्णशष्कुल्याकाशसंयोगस्यैव श्रोत्रव्यापारत्वादित्याहुः ॥

अन्ये तु कारकार्थत्वविषयक्रियार्थोपादानगोचरकत्वं कारकत्वं करणत्वं कर्त्रादेरप्यवंविधोपाधिसम्भवे करणत्वमिष्यत एव। हस्तादीनां त्वग्न्यादिकारकोपादानार्थक्रियागोचरत्वेनाकारणत्वमेवेत्याहुः ॥

तदनेनेति। यद्यप्येतत्कर्मण्यतिप्रसक्तं तथाप्यनेनोपाधिना तदपि करणमेव कारकत्वेन च विशेषणाचाकारके ऽतिव्याप्तिरितिभावः ॥

(१) (पाणिनि सू.) अ १ पा. ४ सू. ३०।

अकरणा प्रमाणोत्पत्तिः प्रसज्येत कर्त्तुः करणे चरितार्थत्वादिति किं केन सङ्गतमित्यत आह। नाकरण इति ॥ [१६-८]

वस्तुसिद्धप्रधानक्रियासम्बन्धनिबन्धनप्रवृत्तयः कारकशब्दा इत्याशयवतश्चोद्यं "यदीत्यादिना" बुद्धिसिद्ध-प्रधानक्रियासम्बन्धनिबन्धनप्रवृत्तयः कारकशब्दा इत्या-शयवतः समाधानं "न पाचकशब्दादिवदित्यादिने"ति टीकायां निक्षिप्तस्य वार्त्तिकतात्पर्यस्य सङ्क्षेपः ॥

तुल्यवदिति ।[१६-२०] तुलया सम्मितमिव न न्यूनं नाधिकमित्यर्थः ॥

अपदार्थव्याख्यानबीजमनुपपत्तिमाह । अकरणेति । यथोक्ते वैयधिकरण्यात् तथा व्याख्यानमित्यर्थः ।

वस्तुसिद्धेति । क्रियाकारकयोः कार्यकारणभावसम्बन्धे विशेषणीभूता क्रिया कारकनिरूपिकेत्याक्षेप इत्यर्थः । बुद्धिसिद्धेति । उपलक्षणीभूतैव क्रिया तादृशसम्बन्धे कारकनिरूपिका उपलक्षणं चासदपि स्वज्ञानेन व्यावर्त्तकमिति समाधानमित्यर्थः ।

तुल्यवदित्यत्र तुल्यशब्दस्यैव सादृश्याभिधायित्वात् सादृश्यवाची वतिप्रत्ययो व्यर्थः इत्यत आह । तुलयेति । तथा च तुलया सम्मितमित्यत्रार्थे "नौवयोधर्मविषमूलमूले"त्यादिसूत्रेण (१) सम्मि-

(१) (पाणिनि सू.) अ ४ पा ४ सू. ८१ ।

तदनेन प्रपञ्चेन प्रमां प्रति प्रमातृप्रमेययोरकारण-त्वमेव दर्शितमिति भ्रमो माभूदित्युपसंहारव्याजेनाह । तत्प्रमाणमिति । [१७।६] सत्यपि चोपलब्धिसाधनत्वे साक्षादिति शेषः । सम्प्रत्ययो-झटितिप्रत्ययः ॥

"साधकतमार्थं पृच्छति"—न तावत् साधकानां फलकृतावतिशयानतिशयौ, तस्यैकस्य सर्वान् प्रत्य-विशेषात् । नापि व्यापारकृतौ, परस्परविलक्षणव्या-

तार्थं यत्प्रत्ययान्तमुख्यशब्दो न सदृशवाची, किं तु अन्यूनानति-रिक्तवाचीति नोक्तदोष इत्यर्थः ॥

सन्निपत्याऽनाहत्येति पूर्वोक्तदोषयोष्टीकाकारस्सम्मतिमाह । तदनेनेति । ननु पूर्वमपि प्रमातृप्रमेययोरुपलब्धिसाधनत्वे सत्येव करणे विशेष उक्त इति न पूर्वापेक्षया विशेष इत्यत आह । साक्षा-दिति । तथा च पूर्वं साक्षात्साधनत्वमनादाय लक्षणमुक्तमिदानीं तु साक्षात्साधनत्वमभ्युपगम्य तदुच्यत इत्यर्थः । स्फुटः प्रत्ययः मुख्यताबोधः । साधकत्वतमपोः प्रसिद्धार्थत्वान्न तत्र सन्दिग्धस्य प्रश्नः किं तु विप्रतिपन्नस्येति दर्शयितुं विप्रतिपत्तिबीजमाह । न ताव-दिति । तमप्प्रत्ययस्य प्रकृत्यर्थातिशयवाचित्वात् फलकृतौ फल-जनने करणस्य न कर्त्राद्यपेक्षया ऽतिशयस्तमबर्थ इत्यर्थः । तस्येति । तस्य-फलहेतुत्वस्य सर्वकारकसाधारणत्वात् फलाहेतोरकारणत्वा-दित्यर्थः । नापीति । प्रधानक्रियानुकूलस्वव्यापारोऽपि सर्वकारक-

पारवत्तामात्रस्य सर्वसाधारण्यात् । फलानुगुणत्वं तु व्यापारस्याविशिष्टमेवेत्याशयवानिति हृदयशेषः ॥

यद्यप्ययोगव्यवच्छेद एवातिशयस्तथापि तुल्यत्वे सत्यपि अतिशयानतिशयौ तस्यैव चिन्त्येते, न तु वैधर्म्यमात्रमतिशय इत्यभिसन्धायाऽन्ययोगव्यवच्छेदो ऽपि दर्शितः । अमुं चार्थमनन्तरमेव विभावयिष्यति ॥

ननु यथा कर्त्रादौ सति नावश्यं फलं, तथा करणे ऽपि सति कदाचित् न स्यात् कारकत्वाविशेषात्, दृश्यते च, न हि परशौ सति छिदा भवत्येवेत्यत आह । प्रमातृप्रमेये हीति ॥ [१७।१४]

"उपक्षीणवृत्तिनी" इति व्यापारवतः कारकत्वमभिप्रेति । तेन परशुरपि व्यापारवानेव करणं, तथाभूतेन च फलस्यायोगव्यवच्छेद एव, न तु व्यापारवताऽपि

साधारण इत्यर्थः । हृदयशेष-स्तात्पर्यम् । यद्यपीति । तथा चान्यव्यवच्छेदस्य कारकान्तरसाधारणतया तमवधेकथनं तदनुपयोग इत्यर्थः ॥

ननुपक्षीणवृत्तिनी इत्यनेनान्यथासिद्धिप्रदर्शनात् प्रमातृप्रमेययोरकारणत्वे ऽपसिद्धान्त इत्यत आह । नन्विति । व्यापारवत इति । फलाव्यभिचारिव्यापारवत्त्वमित्यर्थः ।

यद्यपि व्यापाराऽऽद्यचणे व्यासङ्गे चिरस्थिरत्वगिन्द्रियसंयोगे च

कर्त्रादिना, तद्व्यापारेण करणव्यापारस्य सम्पादनविलम्बात्। व्यापारवतस्तु करणस्य नान्यत् सम्पादनीयमस्तीत्यर्थः। तदिदमुक्तं प्रमाणव्यापारे सति तु भवत्येवेति ॥ [१७।१६]

सति फलाभावादिदमसिद्धं, तथापि कार्यसामग्रीव्याप्तव्यापारवत्त्वमर्थः, आद्यक्षणे व्यासङ्गे च फलाभावेन न सामग्री। न च हस्ताद्यव्याप्तिः फलाव्यवहितपूर्वक्षणवर्त्तिज्वालनादिव्यापारवत्त्वस्य हस्ते सम्भवात्। अनुमितौ तु लिङ्गपरामर्शजनकव्याप्तिस्मृतिरेव करणं, परामर्शस्तु व्यापारः, व्यापारत्वं च तज्जन्यजनकत्वे सति तज्जन्यत्वं शब्दतद्ध्वंससाक्षात्कारयोस्तु शब्द एव श्रोत्रव्यापारः। शब्दप्रागभावसाक्षात्कारे तु कर्णशष्कुलीसंयोग इत्युक्तम्। यद्वा क्रियया ऽयोगव्यवच्छेदेन सम्बन्धि करणमित्यर्थः। न च पौनरुक्त्यम्। क्रियया ऽयोगव्यवच्छिन्नं कारकं करणमित्यर्थात्। कारकत्वेन विशेषणान्नेश्वरस्य स्वज्ञानं प्रति करणत्वप्रसङ्गः। न च सामग्र्यामतिव्याप्तिः। सा हि नैकक्षणवर्त्तियावत्कारणात्मिका, यागादौ चिरान्तरितत्वेन स्वर्गादिसामग्र्यामव्याप्तेः। अपि च सामग्री क्षणिका स्थिरा वा, आद्ये अपसिद्धान्तः। अन्त्ये क्षणान्तरेऽपि कार्योत्पादप्रसङ्गः। किं तु प्रागभावेतरकादाचित्कयावत्कारणप्रागभावानाधारः कार्यप्रागभावाधारः क्षणः सामग्री, क्षणस्य लक्षणाद्यवृत्तित्वेन न क्षणिकत्वं न वा स्थिरत्वम्। न चैवमेकक्षणोत्तरवर्त्त्यनेककार्याणां समानसामग्रीकत्वापत्तौ भेदाभावप्रसङ्ग इति

तदनेन व्यापारवतः फलाव्यभिचारित्वं साधकतमत्वमिति दर्शितम् ॥

कल्पान्तरम्—यद्वानिति। परतन्त्रेणेति परव्यापारेणाश्रीयते ऽपेक्ष्यत इत्यर्थः॥

एतदेव पूर्वमुक्तमिति स्मारयति। कर्त्रधीनं चेति॥ [१७।२०]

वाच्यम्। अधिष्ठानाभेदे ऽपि निरूपककारणभेदेन सामग्रीभेदात्। तत्तत्कारणजन्यत्वस्य तत्त्वं प्रति प्रयोजकत्वात्। अन्यथा घटादेः सामग्रीध्वंसस्यैकसामग्रीकत्वेनाभेदप्रसङ्गः। क्षणस्याकारणं कालापाधीनां ह्यधिकरणत्वेन कारणत्वम् अधिकरणत्वं चानेककालावस्थायिनामेवेत्यकारणत्वान्न सामग्र्यामतिव्याप्तिः।

ननु "यद्वान् प्रमिमीत" इत्यत्र यद्वानित्येतावन्मात्रं कल्पान्तरं, न तु समुदाय इत्यनुपपत्त्या यावदेव कल्पान्तरं तावदितिशब्देनावच्छेदयति। कल्पान्तरं यद्वानिति। ननु "कल्पान्तरमाह यद्वान्वा प्रमिमीते सो ऽतिशय" इत्यनन्वित इति पदावच्छिन्नमाहेति—क्रियाकर्मेत्याह। कल्पान्तरं यद्वानिति। यद्वा कल्पान्तरत्वेन रूपेण न कल्पान्तरग्रहणं किं तु यद्वस्तुगत्या कल्पान्तरं तस्य ग्रहणमिति बोधयितुमाहेति परित्यज्य ग्रन्थो गृहीतः। एवमग्रे ऽपि। परतन्त्रेणेत्यस्य परजन्येनेत्यर्थ इति भ्रमं निवारयति। परव्यापारेणेति। सर्वेषां करणानां न कर्त्राश्रितत्वमित्यन्यथा व्याचष्टे। अपेक्ष्यत इति॥

यद्यपि कर्त्तृव्यापार्यत्वं करणत्वमिति न व्यभिचरत्येव, तथापि परम्पराव्यापार्येणापि कर्मणा व्यभिचारो माभूदित्याशङ्क्य प्रकृते ऽवधारणं सम्भवप्राचुर्यात् कृतम्। आगामिवार्त्तिकस्य कल्पान्तरत्वं निवारयति। अस्यैवेति। [१७।२३] कल्पान्तरमिति ॥ [१७।२४]

पूर्वकल्पविवरणेन पौनरुक्त्यभिया कल्पान्तरं संगृहीतं कथञ्चित् समर्थयति। पूर्वेणेति ॥ [१७।२५]

कर्मणः स्वातन्त्र्यमसम्भावितप्रायमिति विशेषनिषेधो ऽनुपपन्न इत्यत आह। अकर्त्तृत्वमिति ।[१७।२६] कल्पान्तरं —संयोगवदिति ॥

कर्मणा व्यभिचार इति। यद्यपि तेनोपाधिना कर्मण्यपि करणव्यवहार इष्यत एव तथापि यो ऽनेन व्यभिचारं मन्यते तं प्रत्यवधारणमत एव सम्भवप्राचुर्यादित्युक्तम्। न चात्मधर्मध्वंसकौपीनाच्छादनादावपि करणत्वप्रसङ्गः फलकालस्य व्यापारशालिप्रकरणतेत्यर्थात्।

कल्पान्तरमितीति। कल्पान्तरमिति कृत्वा यत्कल्पान्तरं गृहीतं तत्र पूर्वकल्पविवरणेन पौनरुक्त्यभिया कथञ्चित्समर्थयतीति योजना ॥

हेतुविशेषवाचककर्त्तृपदस्य हेतुसामान्यपरतायां लक्षणाबीजमाह। कर्मण इति। विशेषेति। हेतुत्वविशेषस्य कर्त्तृत्वस्य निषेध इत्यर्थः ॥